CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

श्रीः
भा॰न॰
टी॰
१

ॐश्री गणेशाय नमः ॐगुणानांगुणिनांवाश्यैर्वृणुतेककरुणानिधिं तमहंप्रावरणंयामिपरमानंदमाधवं १ त्रिगुणाष्टभिर
ध्यायैर्वैवस्वतमनोरन्वयः नवमेस्मिन्सकीर्तिप्रसंगायवितन्यते २ एवमुक्तोष्टमस्कंधेसद्धर्मःसत्यपालकः कर्तव्या

राजोवाच मन्वंतराणिसर्वाणित्वयोक्तानिश्रुतानिमे वीर्याण्यनंतवीर्यस्यहरेस्तत्रकृतानिच १ योसौसत्यव्र
तोनामराजर्षिर्द्रविडेश्वरः ज्ञानंयोतीतकल्पांतेलेभेपुरुषसेवया २ सवैविवस्वतःपुत्रोमनुरासीदितिश्रु
तं त्वत्तःतस्यसुताःप्रोक्ताइक्ष्वाकुप्रमुखानृपाः ३ तेषांवंशंपृथक्ब्रह्मन्वंशानुचरितानिच कीर्तयस्वमहा
भागनित्यंशुश्रूषतांहिनः ४ येभू तायेभविष्याश्चभवंत्यद्यतनाश्चये ते
षांनःपुण्यकीर्तीनांसर्वेषांवदविक्र मान् ५ सूत उवाच एवंपरीक्षिता
राज्ञासदसिब्रह्मवादिनां पृष्टःप्रो वाचभगवाञ्छुकःपरमधर्मवित्
६ श्रीशुक उवाच श्रूयतांमानवो वंशःप्राचुर्येणपरंतप नशक्यतेवि
स्तरतोवक्तुंवर्षशतैरपि ७ पराव रेषांभूतानामात्मायःपुरुषःपरः
सएवासीदिदंविश्वंकल्पांतेन्यन्नकिं चन ८ तस्यनाभेःसमभवत्पद्मको
शोहिरण्मयः तस्मिन्जज्ञेमहाराज स्वयंभूश्चतुराननः ९ मरीचिर्म
नसस्तस्यजज्ञेतस्यापिकश्यपः दा क्षायण्यांततोदित्यांविवस्वानभव
त्सुतः १० ततोमनुःश्राद्धदेवःसंज्ञायामासभारत श्रद्धायांजनयामासदशपुत्रान्सआत्मवान् ११ ॥

लकवज्रादिमन्वादीनांनिरूपणैः ३ सद्धर्मस्तुहुमत्वानामंतरंगेष्वासक्तया 'सूर्यसोमान्वयाख्यानैरथुनसंगतोच्यते ४ तत्र
चत्वयोदशभिरध्यायैःसूर्यवंशोनुवर्ण्यते एकादशभिरध्यायैःसोमवंशस्ततःपरैः तत्रतुप्रथमेध्यायेवैवस्वतसुतान्वयैः
सोमवंशाश्रवंशोक्तोसुद्युम्नस्त्रीत्वमुच्यते ६ उक्तानुवादपूर्वकंवैवस्वतमनोर्वंशंपृच्छतिमन्वंतराणीतिपंचभिः ७ अनुक्तं
वंशंवक्तुंपरोक्तमेवनावदद्वंशंतस्यकीर्तकंश्रीनारायणमारभ्यपुत्रत्सुस्मारयतिपरावरेषामितिपंचभिः ८ ९ १० ११ १

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

नाभागंचेतिपाठेपि नभग एव नाभागः १२ सर्यपात्रेस्य सुद्युम्नस्य स्त्रीत्वे सति बुधात्पुरूरवःप्रभृतिसोमवंशसंभवं वक्तुं
प्रस्तावमिलोपाख्यानमाह अप्रजस्य मनोः पूर्वमित्यादिना यावदध्यायसमाप्ति एवमिक्ष्वाकुप्रभृतीनामुत्पत्तेः प्राक्
१३ दुहित्रर्थं मम कन्या यथा भवेत्तथा यजेति होतारं सम्यक् अयाचत पय एव व्रतमाहारो नियतो यस्याः १४ अध्व

इक्ष्वाकुनृगशर्यातिदिष्टधृष्टकरूषकान् नरिष्यन्तं पृषध्रं च नभगं च कविं विभुः १२ अप्रजस्य मनोः पू
र्वं वसिष्ठो भगवान्किल मित्रावरुणयोरिष्टिं प्रजार्थमकरोद्विभुः १३ तत्र श्रद्धा मनोः पत्नी होतारं समयाच
त दुहित्रर्थमुपागम्य प्रणिपत्य पयोव्रता १४ प्रेषितोध्वर्युणा होता ध्यायंस्तत्समाहितः हविषि व्य-
चरत्तेन वषट्कारं गृणन्द्विजः १५ होतुस्तद्व्यभिचारेण कन्येला नाम साभवत् तां विलोक्य मनुः प्राह ना-
तितुष्टमना गुरुं १६ भगवन्किमिदं जातं कर्म वो ब्रह्मवादिनां विपर्ययमहो कष्टं मैवं स्याद्ब्रह्मविक्रिया
१७ यूयं मंत्रविदो युक्ताः तपसा दग्धकिल्बिषाः कुतः संकल्पवैषम्यमनृतं विबुधेष्वपि १८ निशम्य तद्
वचस्तस्य भगवान्प्रपितामहः होतुर्व्यतिक्रमं ज्ञात्वा बभाषे रविनंदनं १९ एतत्संकल्पवैषम्यं होतुस्ते व्यभि-
चारतः तथापि साधयिष्ये ते सुप्रजस्त्वं स्वतेजसा २० एवं व्यवसितो राजन्भगवान्स महायशाः अस्तौषीदा
दिपुरुषमिलायाः पुंस्त्वकाम्यया २१ तस्मै कामवरं तुष्टो भगवान्हरिरीश्वरः ददाविलाभवत्तेन सुद्युम्नः पुरु
षर्षभः २२ स एकदा महाराज विचरन्मृगयां वने वृतः कतिपयामात्यैरश्वमारुह्य सैन्धवं २३ प्रगृह्य रु
चिरं चापं शरांश्च परमाद्भुतान् दंशितोनुमृगं वीरो जगाम दिशमुत्तरां २४ स कुमारो वनं मेरोरधस्तात्प्रविवे
श ह यत्रास्ते भगवाञ्छर्वो रममाणः सहोमया २५ तस्मिन्प्रविष्ट एवासौ सुद्युम्नः परवीरहा अपश्यत्स्त्रि
यमात्मानमश्वं च वडवां नृप २६

र्युणा होतर्यजेति प्रेषितो होता तेन गृहीतो हविर्विशेषो येन तत् तथा प्रार्थितं ध्यायन् व्यचरत् अयजत् पाठांतरे तत्प्रार्थ
यन्वायावषट्कारं गृणन् वौषट् इति उच्चारयन् १५ ब्रह्मविक्रिया मंत्रान्यथात्वं १७ १८ प्रपितामहो वसिष्ठः १९
२० २१ २२ २३ २४ २५ २६ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

श्रीः
भा०न०
टी०
२

विगततिमिरंस्त्राभासः अन्यप्रकाशस्त्वयास्तनथाभूतादिशःकुर्वंतः २५ प्रसंगंरत्यभिनिवेशंस्त्रीप्रसंगदर्शनकल्मषि

तथातदनुगाःसर्वेआत्मलिंगविपर्ययं दृष्ट्वाविमनसोभूवन्वीक्ष्यमाणाःपरस्परं २७ राजोवाच कथमेवं
गुणोदेशःकेनवाभगवन्कृतः प्रश्नमेवं समाचक्ष्वपरंकौतूहलंहिनः २८ शुकउवाच एकदागिरिशं
द्रष्टुमृषयःतत्रसुव्रताः दिशोवितिमिराभासाःकुर्वंतःसमुपागमन् २९ तान्विलोक्यांबिकादेवीविवासा
व्रीडिताभृशं भर्तुरंकात्समुत्थायनीवीमाश्वथपर्यधात् ३० ऋषयोपितयोर्वीक्ष्यप्रसंगंरममाणयोः
निवृत्ताःप्रययुस्तस्मान्नरनारायणाश्रमं ३१ तदिदंभगवानाहप्रियायाःप्रियकाम्यया स्थानंयःप्रविशेदे
तत्सवैयोषिद्भवेदिति ३२ ततऊर्ध्वंवनंतद्वैपुरुषावर्जयंतिहि साचानुचरसंयुक्ताविचचारवनाद्वनं ३३
अथतामाश्रमाभ्याशेचरंतीप्रमदोत्तमां स्त्रीभिःपरिवृतांवीक्ष्यचकमेभगवान्बुधः ३४ सापितंचकमेसुभ्रू
ःसोमराजसुतंपतिं सतस्यांजनयामासपुरूरवसमात्मजं ३५ एवंस्त्रीत्वमनुप्राप्तःसुद्युम्नोमानवोनृपः
सस्मारसकुलाचार्यंवसिष्ठमितिशुश्रुम ३६ सतस्यतांदशांदृष्ट्वाकृपयाभृशपीडितः सुद्युम्नस्याशाय
न्पुंस्त्वमुपधावतशंकरम् ३७ तुष्टस्तस्मैसभगवानृषयेप्रियमावहन् स्वांचवाचमृतांकुर्वन्निदमाह
विशांपते ३८ मासंपुमान्सभवितामासंस्त्रीतवगोत्रजः इत्थंव्यवस्थयाकामंसुद्युम्नोवतुमेदिनीं ३९ आचा
र्यानुग्रहात्कामंलब्ध्वापुंस्त्वंव्यवस्थया पालयामासजगतींनाभ्यनंदन्स्मतंप्रजाः ४० तस्योत्कलोगयोरा
जन्विमलश्चसुतास्त्रयः दक्षिणापथराजानोबभूवुर्धर्मवत्सलाः ४१ ततःपरिणतेकालेप्रतिष्ठानप
तिःप्रभुः पुरूरवसउत्सृज्यगांपुत्रायगतोवनं ४२ इति भाग तेन मस्कंधेइलोपाख्यानेप्रथमोध्यायः १

तमनसःसंतःतत्प्रसंगमप्यत्रनरनारायणाश्रमंप्रययुः ३१ प्रासंगिकमुक्त्वाप्रस्तुतंवर्णयति साचेति अनुचरीसं
युक्तेतिवक्तव्येभूतमर्यादागत्याउक्तनिर्देशः ३३ आशयन्इच्छन् ३७ ३८ ३९ नाभ्यनंदन्स्त्रीत्वेनलज्जयामासंमा
संनिलीयावस्थानात् ४० इति भावा दीपि यांन मस्कं प्रथ ध्यायः १ ॥

द्वितीये मनुपुत्राणां ह्यावपुत्रो विरागतः करूषकादिपंचानां वंशानाह ललुक्रमात् वैवस्वतः इक्ष्वाकुप्रमुखैर्ज्येष्ठो येषां तान्
१ तत्र पृषध्रस्य वंशो नाभवदिति सहेतुकमाह पृषध्रस्त्वित्यादिना कविः कनीयानित्यतः प्राक्तनेन ग्रंथेन खड्गपाणिः
सन् नक्तिष्टनो जागरणं वीरासनं तदेव व्रतं यस्य यत्तः प्रयत्नः अवहितः सन् गाः पालयामास ३ प्रवर्षे लोव्याघ्रः ४ प्रम्लीना उडुगा

श्रीशुक उवाच एवं गतेऽथ सुद्युम्ने मनुर्वैवस्वतः सुते पुत्रकामस्तपस्तेपे यमुनायां शतं समाः १ ततोऽयजन्मनुर्दे
वमपत्यार्थं हरिं प्रभुं इक्ष्वाकुपूर्वजान्लेभे पुत्रान्स्वसदृशान्दश २ पृषध्रस्तु मनोः पुत्रो गोपालो गुरुणा कृ
तः पालयामास गा यत्तो रात्र्यां वीरासनव्रतः ३ एकदा प्राविशद्गोष्ठं शार्दूलो निशि वर्षति शयाना गाव उत्थाय
भीतास्ता बभ्रमुर्व्रजे ४ एकां जग्राह बलवान्सा चुक्रोश भयातुरा तस्यास्तत्क्रंदितं श्रुत्वा पृषध्रोऽभिससार ह
खड्गमादाय तरसा प्रलीनोडुगणे निशि अजानन्नहनद्बभ्रोः शिरः शार्दूलशंकया ६ व्याघ्रोऽपि वृक्णश्रवणो नि
स्त्रिंशाग्राहतस्ततः निश्चक्राम भृशं भीतो रक्तं पथि समुत्सृजन् ७ मन्यमानो हतं व्याघ्रं पृषध्रः परवीरहा
अद्राक्षीत्स्वहतां बभ्रुं व्युष्टायां निशि दुःखितः ८ तं शशाप कुलाचार्यः कृतागसमकामतः न क्षत्रबन्धुः शू
द्रस्त्वं कर्मणा भवितामुना ९ एवं शप्तस्तु गुरुणा प्रत्यगृह्णात्कृतांजलिः अधारयद्व्रतं वीर ऊर्ध्वरेता मुनिप्रि
यं १० वासुदेवे भगवति सर्वात्मनि परेऽमले एकांतित्वं गतो भक्त्या सर्वभूतसुहृत्समः ११ विमुक्तसंगः शांता
त्मा संयतात्मापरिग्रहः यदृच्छयोपपन्नेन कल्पयन्वृत्तिमात्मनः १२ आत्मन्यात्मानमाधाय ज्ञानतृप्तः समाहि
तः विचचार महीमेतां जडान्धबधिराकृतिः १३ एवं वृत्तो वनं गत्वा दृष्ट्वा दावाग्निमुत्थितं तेनोपयुक्तकरणो ब्रह्म
प्राप परं मुनिः १४ कविः कनीयान्विषयेषु निःस्पृहो विसृज्य राज्यं सह बन्धुभिर्वनं निवेश्य चित्ते पुरुषं स्वरोचि
षं विवेश कैशोरवयाः परं गतः १५ ॥

णायां भातायां निशि ८ क्षत्रबन्धुः पितेन न भविता अपितु शूद्रो भवितेति ९ १० ११ १२ १३ उपयुक्तकरणः दग्धदे
हः १४ अत एव पितृवंशो नाभवदित्याह कविरिति बन्धुभिः सह राज्यं विसृज्य १४ १५
स्मिन्न समये बभ्रोः कपिलायाः गोः ६ गां कामतो न मत्वा नेति व्यापयित्वे वृक्णश्रवणा छिन्नकर्णाऽत्यायुक्ते ७ व्युष्टायां प्र

श्रीः
भा०न०
टी०
२

१६ ब्रह्मभूयं ब्राह्मणत्वं नृगस्य वंशः पुत्रः सुमतिः ततो भूतज्योतिः ततो वसुः १७ ओघवतः पिता तत्पुत्रो ओघवानेवे
त्यर्थः तदेवं त्रिभिः श्लोकैः करूषधृष्टनृगाणां वंशा उक्ताः नरिष्यन्तस्य वंशमाह चित्रसेन इति सार्द्धैस्त्रिभिः ततदस्यादेर्य
माधिक्यं ख्यातं तत्रानेन यतन इत्यादि पदं व्याख्येयं यज्ञतन्त्रतन्त्रतन्त्रवेश्यस्य पञ्चाद्वैश्यगादिति व्याख्येयं १९ अग्निवे

कन्यापाक्यानवादासम्बाधाः क्षत्रजातयः उत्तरायणगोत्रा ब्राह्मण्या धर्मवत्सलाः १६ धृष्टात् धार्ष्टमभूत्क्षे
त्रं ब्रह्मभूयं गतं क्षितौ नृगस्य वंशः सुमतिर्भूतज्योतिस्ततो वसुः १७ वसोः प्रतीकस्तत्पुत्र ओघवानोघवत्पिता
कन्या चौघवती नाम सुदर्शन उवाह तां १८ चित्रसेनो नरिष्यन्ताद्दक्षस्तस्य सुतोऽभवत् तस्य मीढ्वांस्ततः कूर्च इ
न्द्रसेनस्तु तत्सुतः १९ वीतिहोत्रस्त्विन्द्रसेनात्तस्य सत्यश्रवा अभूत् उरुश्रवाः सुतस्तस्य देवदत्तस्ततोऽभवत् २० त
तोऽग्निवेश्यो भगवानग्निः स्वयमभूत्सुतः कानीन इति विख्यातो जातूकर्ण्यो महानृषिः २१ ततो ब्रह्मकुलं जात
माग्निवेश्यायनं नृप नरिष्यन्तान्वयः प्रोक्तो दिष्टवंशमतः शृणु २२ नाभागो दिष्टपुत्रोऽन्यः कर्मणा वैश्यतां ग
तः भलन्दनः सुतस्तस्य वत्सप्रीतिर्भलन्दनात् २३ वत्सप्रीतेः सुतः प्रांशुस्तत्सुतं प्रमतिं विदुः खनित्रः प्रमते
स्तस्माच्चाक्षुषोऽथ विविंशतिः २४ विविंशतेः सुतो रंभः खनिनेत्रोऽस्य धार्मिकः करन्धमो महाराज तस्यासीदा
त्मजो नृप २५ तस्याविक्षित्सुतो यस्य मरुत्तश्चक्रवर्त्यभूत् संवर्तोऽयाजयद्यं वै महायोग्यङ्गिरःसुतः २६ म
रुत्तस्य यथा यज्ञो न तथान्यस्य कश्चन सर्वं हिरण्मयं त्वासीद्यत्किंचिच्चास्य शोभनम् २७ अमाद्यदिन्द्रः सोमे
न दक्षिणाभिर्द्विजातयः मरुतः परिवेष्टारो विश्वेदेवाः सभासदः २८ मरुत्तस्य दमः पुत्रस्तस्यासीद्राज्यवर्ध
नः सुधृतिस्तत्सुतो जज्ञे सौधृतेयो नरः सुतः २९ तत्सुतः केवलस्तस्माद्धुन्धुमान्वेगवांस्ततः बुधस्तस्याभ
वद्यस्मात्तृणबिन्दुर्महीपतिः ३०

अयं च कानीन इति जातूकर्ण्य इति च विख्यातः २१ दिष्टस्य पुत्रो नाभागो वक्ष्यमाणान्नाभागादन्य इति अंतिमं बुद्धासार्थ्य
प्रत्यवदमाह २३ अंगिरसः सुतो महायोगी संवर्तो यमयाजयत् २६ यस्य यत्किंचित्पात्रादिकमस्ति तत्सर्वं हिरण्मयं
शोभनमासीत् २७ अमाद्यत् आहृष्यत् २८ २९ ३०

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

यतः पुत्रास्तृणाः विद्याः पुत्रोऽभवत् ३१ ३२ अयं च श्लोकः कन्यावंशप्रकीर्तनार्थः तया हि यस्यामिडविडायां विश्रवा धनदं देवश्रव
णास्यं तं जनयामास लोके वैश्रवण एडविड इति प्रसिद्धः तानेवाह विशाल इति तस्य तृणबिन्दोः सुताः ३३ सहदेवजः देवजे
न सहितः पाठान्तरे वा मान्यमानः प्रयत्नः स एव ३४ वैशालभूपाला विशालस्यान्वये जाताः ३६ इति भावा नव स्कंधे
द्विती ध्यायः २ तृतीये मनुपुत्रस्य शर्यातेः कीर्त्यतेऽन्वयः यत्रासौ कन्यया ख्याते दैवतं च महाद्भुतं ब्रह्मिष्ठो वेदार्थज्ञः त

तं भेजेऽलम्बुषा देवी भजनीयगुणालयं वराप्सरा यतः पुत्राः कन्या चेडविडाभवत् ३१ यस्यामुत्पादयामास विश्र
वा धनदं सुतं प्रादाय विद्यां परमामृषिर्योगेश्वरात्पितुः ३२ विशालः शून्यबन्धुश्च धूम्रकेतुश्च तत्सुताः विशा
लो वंशकृद्राजा वैशालीं निर्ममे पुरीं ३३ हेमचन्द्रः सुतस्तस्य धूम्राक्षस्तस्य चात्मजः तत्पुत्रात्संयमादासीत्कृशाश्वः
सहदेवजः ३४ कृशाश्वात्सोमदत्तोऽभूद्योऽश्वमेधैरिडस्पतिं इष्ट्वा पुरुषमापाग्र्यां गतिं योगेश्वराश्रितः ३५ सौम
दत्तिस्तु सुमतिस्तत्पुत्रो जनमेजयः एते वैशालभूपालास्तृणबिन्दोर्यशोधराः ३६ इति श्रीभाग ते ९ स्कं
द्वितीयोऽध्यायः २ श्रीशुक उवाच शर्यातिर्मानवो राजा ब्रह्मिष्ठः स बभूव ह यो वा अङ्गिरसां सत्रे द्वितीयमहरूचिवा
न् १ सुकन्या नाम तस्यासीत्कन्या कमललोचना तया सार्धं वनगतो ह्यगमच्च्यवनाश्रमं २ सा सखीभिः परि
वृता विचिन्वत्यङ्घ्रिपान्वने वल्मीकरन्ध्रे ददृशे खद्योते इव ज्योतिषी ३ ते दैवचोदिता बाला ज्योतिषी कण्टकेन वै
अविध्यन्मुग्धभावेन सुस्रावासृक् ततो बहिः ४ शकृन्मूत्रनिरोधोऽभूत्सैनिकानां च तत्क्षणात् राजर्षिस्तमुपाल
क्ष्य पुरुषान्विस्मितोऽब्रवीत् ५ अप्यभद्रं न युष्माभिर्भार्गवस्य विचेष्टितं व्यक्तं केनापि नस्तस्य कृतमाश्रमदूषणं
६ सुकन्या प्राह पितरं भीता किंचित्कृतं मया द्वे ज्योतिषी अजानन्त्या निर्भिन्ने कण्टकेन वै ७ दुहितुस्तद्वचः श्रुत्वा श
र्यातिर्जातसाध्वसः मुनिं प्रसादयामास वल्मीकान्तर्हितं शनैः ८ तदभिप्रायमाज्ञाय प्रादाद्दुहितरं मुनेः कृच्छ्रा
न्मुक्तस्तमामन्त्र्य पुरं प्रायात्समाहितः ९ ॥

देवाह्न यो वा इति द्वितीयमहः द्वितीयेऽह्नि क्रियमाणं कर्म सुविद्वानुवाच तस्य वैश्वदेवमुक्तान बहिरागते इत्यादिना वक्ष्यति १
आदौ तावत्सुकन्याख्यानमाह सुकन्या नामेत्यादिना २ ५ भार्गवस्य च्यवनस्याभद्रमपराधः ६ ८ मुनेः यमक कन्यादानेन
ऊनयेन्मुच्यमाने कतिचिद्वर्षाण्यस्याविवाहः कृतो न वेत्यादिवाक्यैः तदभिप्रायं तस्य मुनेरभिप्रायं ज्ञात्वा तस्मै तां दुहितरं प्रादात् ९

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

श्रीः
भा॰ न
टी॰
४

१० हे ईश्वरौ ते मह्यं यौ युवां मत्प्रियं यस्मात्कारणात्प्रदत्तं सम्पादयतां ११ अथ सोमपयोः सोमपानवर्जितयोः सोमस्य ग्रहं सोमग्रहणे
पात्रं ग्रहीष्ये दास्यामीति युवां सोमेन यक्ष्यामीत्यर्थः ऐन्द्रवायवं गृह्णातीत्यादिषु स्वस्वदेवतासम्बन्धानुपपत्त्या गृह्णाति येषु
ग्रहं पर्यवसायित्वात् १२ वाढमित्यभिनंद्य भवान्नस्मिन्निमज्जतामित्यवतः १३ हृदं प्रवेशितः तावत्पतमतिहं दूषृष्टे

कस्यचिद्वयः कालस्वनन्तमत्याश्रममागतौ तौ ययाचे पिताप्रोवाच वयो मे दत्तमीश्वरौ ११ ग्रहं ग्रहीष्ये सोमस्य
यज्ञे वामप्यसोमयोः क्रियतां मे वयो रूपं प्रमदानां यदीप्सितं वाढमित्यूचतुर्विप्रमभिनंद्य भिषक्तमौ निम
ज्जतां भवानस्मिन्हृदे सिद्धविनिर्मिते १२ इत्युक्त्वा जरया ग्रस्तदेहो धमनिसंततः हृदं प्रवेशितोश्विभ्यां
वलीपलितविप्रियः १४ पुरुषास्त्रय उत्तस्थुरपीच्या वनिताप्रियाः पद्मस्रजः कुंडलिनस्तुल्यरूपाः सुवा
ससः १५ तान्निरीक्ष्य वरारोहा सरूपान्सूर्यवर्चसः अजानती पतिं साध्वी अश्विनौ शरणं ययौ १६ दर्शयि
त्वा पतिं तस्यै पातिव्रत्येन तोषितौ ऋषिमामंत्र्य ययतुर्विमानेन त्रिविष्टपं १७ यक्ष्यमाणोथ शर्यातिश्च्य
वनस्याश्रमं गतः ददर्श दुहितुः पार्श्वे पुरुषं सूर्यवर्चसं १८ राजा दुहितरं प्राह कृतपादाभिवंदनाम् आशि
षश्चाप्रयुंजानो नातिप्रीतमना इव १९ चिकीर्षितं ते किमिदं पतिस्त्वया प्रलंभितो लोकनमस्कृतो मुनिः यत्त्वं
जराग्रस्तमसत्यसम्मतं विहाय जारं भजसेमुमध्वगं २० कथं मतिस्तेवगतान्यथा सतां कुलप्रसूते कुलदूष
णमिदं बिभर्षि जारं यदपत्रपा कुलं पितुश्च भर्तुश्च नयस्यधस्तमः २१ एवं ब्रुवाणं पितरं स्मयमाना शुचि
स्मिता उवाच तात जामाता तवैष भृगुनन्दनः २२ शशंस पित्रे तत्सर्वं वयोरूपाभिलंभनं विस्मितः परमप्रीतः
तनयां परिषस्वजे २३ सोमेन याजयन्वीरं ग्रहं सोमस्य चाग्रहीत् असोमयोरप्यश्विनोश्च्यवनः स्वेन तेजसा २४
हंतुं तमाददे वज्रं सद्यो मन्युरमर्षितः सवज्रं स्तंभयामास भुजमिंद्रस्य भार्गवः २५ अन्वजानंस्ततः सर्वे ग्रहं सोमस्य चाश्वि
नोः

वा यविष्ठाविवेत्यर्थः १४ अश्विनौ शरणं ययौ युवां इत्थं कस्य्रिमामत्यपतिं दर्शयतमिति प्रार्थयामासेत्यर्थः १६ १९ प्रल
म्भितो वंचितः हे असति प्रसंमतं सत्यजनभीरु २० हे सतां कुलप्रसूते ते मतिरन्यथा तद्विपर्ययेण कथमवगता अवसन्नाग्रवसन्नाय
वमितेनिवातदेहे कुलदूषणमिदमित्यादि २४ मयामत्त्वाणमेवमन्तर्भस्यइन्द्रः २५ २६

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

२७ विषयानुदेशान्प्रभुंक्तमपालयत् २८ ककुद्मिज्येष्ठोयस्मिन्विभुंब्रह्माणं २९ नलब्धःक्षणोवसरोयेन ३० आद्यंब्रह्मा
णं ३१ तेतवयाहृदयेकृताःतेसर्वेकालेननिरुद्धाःसंहृताः त्रिनवसप्तविंशतिःचतुर्युगानितैःविकल्पितोविभक्तः ३३ योदे
वदेवस्यांशोस्तितस्मैनररत्नायदेहि ३३ तदेवाहभुवइति ३४ पुण्यजनत्रासात्यद्भयात्सर्वमेवविवरंपुरंतत्भ्रातृभिःत्य
क्तं ३५ ३६ इति वार्थ पिका नव कंधेतृती ध्यायः ३ चतुर्थेमनुपुत्रस्यनभगस्यकथोच्यते तत्सूनोर्वांबरीषस्य

उत्तानबर्हिरानर्तोभूरिषेणइतित्रयः शर्यातेरभवन्पुत्राआनर्ताद्रेवतोभवत् २७ सोंतःसमुद्रेनगरींविनिर्माय
कुशस्थलीं आस्थितोभुंक्तविषयानानर्तादीनरिंदमः २८ तस्यपुत्रशतंजज्ञेककुद्मिज्येष्ठमुत्तमं ककुद्मीरेव
तींकन्यांस्वामादायविभुंगतः २९ कन्यावरंपरिप्रष्टुंब्रह्मलोकमपावृतं आवर्तमानेगंधर्वेस्थितोलब्धक्षणःक्ष
णं ३० तदंतआद्यमानम्यस्वाभिप्रायंन्यवेदयत् तच्छ्रुत्वाभगवान्ब्रह्माप्रहस्यतमुवाचह ३१ अहोराजन्निरुद्धास्ते
कालेनहृदियेकृताः तत्पुत्रपौत्रनप्तॄणांगोत्राणिच नशृण्महे ३२ कालोभियातस्त्रिणवचतुर्युगविकल्पितः
तद्गच्छदेवदेवांशोबलदेवोमहाबलः कन्यारत्नमिदंराजन्नररत्नायदेहिभोः ३३ भुवोभारावतारायभग
वान्भूतभावनः अवतीर्णोनिजांशेनपुण्यश्रवणकीर्तनः ३४ इत्यादिष्टोभिवंद्याजंनृपःस्वपुरमागतः त्य
क्तंपुण्यजनत्रासाद्भ्रातृभिःदिक्ष्ववस्थितैः ३५ सुतांदत्वानवद्यांगींबलायबलशालिने बदर्याख्यंगतोरा
जातप्तुंनारायणाश्रमं ३६ इति भाग तेन मस्कं तृती ध्यायः ३ श्रीशुकउवाच नाभागोनभगापत्यं
यंततंभ्रातरःकविं यविष्ठंव्यभजन्दायंब्रह्मचारिणमागतं १ भ्रातरोभांक्तकिंमह्यंभजामपितरंतव त्वांम
मार्यास्तताभांक्षुर्मापुत्रकतदादृथाः २

कृत्याप्रतिहतायतः नभगस्यवंशमाह नभगस्यापत्यंनाभागःनाभागादंबरीषोमहाभागवतोभूदितिविवक्षुस्तत्प्रसंगेनतद्वं
नवंशप्रवर्तकस्यनाभागस्यनिष्कपटंचरितंतेनतच्छ्रीरुद्रप्रसादमाह यंततमित्यादिनाब्रह्मचारिणंबहुकालंकुलेगुरोर्वे
संतंनैष्ठिकोमाभूदितिमत्वाविभागसमयेनस्वंभागमप्रकल्प्यभ्रातरःसर्वंदायंविभज्यगृहीतवंतःपश्चात्गुरुकुलादागतंतेभागा
र्थिनंकविंविद्वांसंयविष्ठंपतितंतंतातंपितरंदायंव्यभजन्नित्यर्थः १ एतदेवप्रश्नोत्तराभ्यांदर्शयति नचनाभागःपृच्छा
ति हेभ्रातरःमह्यंकिमवभक्तव्यभजतत किंभागंमदर्थंस्वयंप्रकल्पितवंतःभ्रातरऊचुः तदाविस्मृतमस्माभिरिदानीं

तवपितरंभजामविभजाममंपितरंगृहाणेत्यर्थः

मह्यंपितरंगत्वाह ततइतितातनभ्रातरः श्रेष्ठाः ममतातमभोक्त्वं भागंचक्रुः मदीयोभागः त्वमित्यर्थः पाठांतरे हेतातानकिमिदंम
माभोक्त्वंभजाममपितरंनैतेनुकेतंआर्याःत्वंमह्यंकिमर्थंददुरित्यर्थः पितातमाह हेपुत्रकतन्नतेरुक्षंमाआद्रियथाश्चतात्
तामार्वतेःकुर्वंतनस्मिन्नापदिरमाकार्षीनह्यहंदायत्वेनतवभोगसाधनमित्यर्थः तथापितैर्भागत्वेनदत्तोहंतत्वजीवनोपायं
उपदेक्ष्यामीत्याह इमइतिसपादाभ्यांद्वाभ्यांआंगिरसःषष्ठेषष्ठेहनिप्रवर्तितेषष्ठाःषष्ठेहिभवंतीतिविहितेनषष्ठेहेप्रावर्त्यमाने
षष्ठंषष्ठमहःकर्मोपेत्यप्राप्यकर्मणितस्यब्राह्मणेनसुमेधसोपितेसत्रेविशेषज्ञानेनमुह्यंतिकवेहेविद्वन् ३ तान्महा
त्मनोपित्वमिदमित्याथ्रोदमितिचयेयदुत्तदत्तानायेतिचन्तैवैश्वदेवेसूक्तेशंसयपाठयततःकर्मणिसमाप्तेसतितेस्वर्यंतः

तेस्वर्यंतोधनंसत्रपरिशेषितमात्मनः ४

इमेअंगिरसःसत्रमासतेद्यसुमेधसः षष्ठंषष्ठमुपेत्याहःकवेमुह्यंतिकर्मणि ३ तांस्त्वंशंसयसूक्तेद्वेवैश्व
देवेमहात्मनः ४ दास्यंतितेथयतोगच्छतथासकृतवान्यथा तस्मैदत्वाययुःस्वर्गंतेसत्रपरिशेषितम् ५ तंक
श्चित्स्वीकरिष्यंतंपुरुषःकृष्णदर्शनः उवाचोत्तरतोभ्येत्यममेदंवास्तुकंवसु ६ ममेदमृषिभिर्दत्तमितितर्हि
स्ममानवः स्यान्नौतेपितरिप्रश्नःपृष्टवान्पितरंतथा ७ यज्ञवास्तुगतंसर्वमुच्छिष्टमृषयःक्वचित् चक्रु
र्विभागंरुद्रायसदेवःसर्वमर्हति ८ नाभागस्तंप्रणम्याहतवेशकिलवास्तुकं इत्याहमेपिताब्रह्मन्शिर
सात्वांप्रसादये ९ रुद्रउवाच यत्तेपितावदद्धर्मंत्वंचसत्यंप्रभाषसे ददामितेमंत्रदृशोज्ञानंब्रह्मसनातनं

स्वर्गंगच्छंतःस्वसत्रेपरिशेषितसमवशिष्टमात्मनोधनंतत्वस्यंदास्यंतिअथतस्मात्तान्गच्छेतिशेषादिषुकवाक्यंतथातत
तःसत्रपरिशेषितंसत्रावशेषितंयतने ४ ५ पुरुषःश्रीरुद्रः दृश्यतइतिदर्शनंशरीरंकृष्णदर्शनंयस्यसः वास्तुकंयज्ञभूमिगतं
वस्तुधनंममेत्युक्त्वा ६ तर्हिस्मतदेवममेदमितिमानवोनाभागउवाच पुनश्चरुद्रउवाच नौआवयोरस्मिन्विवादेतेपितरि
प्रश्नःस्यादितिपृष्टवानितिशुकोक्तिः पृष्टस्यमनोर्वाक्यंयज्ञवास्तुगतमिति उच्छिष्टमवशिष्टंक्वचिदितिदक्षाध्वरेउच्छेषणभा
भागोवैरुद्रइतिश्रुतेश्चकिंचसदेवईश्वरःसर्वमप्यर्हतिकिंपुनर्यज्ञावशिष्टमित्यर्थः ७ ८ श्रीरुद्रंप्राहयज्ञइति १०
राम जनारायणनमः

इदमाख्यानं श्रुतिष्वपि दृष्टं तथाहि बह्वृचब्राह्मणं नाभागेनेदिष्टं शेषमिति नाभागदिष्टं वै मानवं ब्रह्मचर्यं वसंतं भ्रातरो निरभजन्
सोब्रवीदित्यादि ११ अस्याख्यानस्य स्मरणे फलमाह य एतदिति आत्मनो गतिं च प्राप्नोतीति शेषः १२ क्वचिदपि न प्रति
हतो ब्रह्मशापोपि ब्राह्मणेन दुर्वाससा निर्मितः कृत्यानलोपि यं नास्पृशत् अतो सौ महाभागवतः अत एव कृती पुण्यवान् १३ न
प्राभूदिति श्रोतुमिच्छामि चरितमिति शेषः ब्रह्मदण्डः कृत्यानलः न प्राभूत् न समर्थो बभूव १४ श्रियं सम्पदं विभवं मैश्वर्यं अतुलं निरुप
मं १५ पुंसामतिदुर्लभमपि तत्सर्वं स्वप्नवत्संस्तुतं निरूपितं अनुपादेयं मेने तत्र हेतुः विभवस्य निर्वाणं नाशं विद्वान् यत् येन वि
भवेन नतत्त्वाज्ञानं पुमान् तमो विशति मोहं निमज्जति १६ नन्वेवं जानंतोपि विभवैषिणो दृश्यंते तत्राह वासुदेव इति भावं भक्तिं

गृहाण द्रविणं दत्तं मत्सत्रे परिशेषितं इत्युक्त्वान्तर्हितो रुद्रो भगवान्सत्यवत्सलः ११ य एतत्संस्मरेत्प्रातः सायं च
सुसमाहितः कविर्भवति मंत्रज्ञो गतिं चैव तथात्मनः १२ नाभागादंबरीषोऽभून्महाभागवतः कृती नास्पृशद्
ब्रह्मशापोपि यं न प्रतिहतः क्वचित् १३ राजोवाच भगवन् श्रोतुमिच्छामि राजर्षेस्तस्य धीमतः न प्राभूद्यत्र निर्मुक्तो
ब्रह्मदण्डो दुरत्ययः १४ श्रीशुक उवाच अंबरीषो महाभागः सप्तद्वीपवतीं महीं अव्ययां च श्रियं लब्ध्वा विभवं चातुलं
भुवि १५ मेनेऽतिदुर्लभं पुंसां सर्वं तत्स्वप्नसंस्तुतं विद्वान्विभवनिर्वाणं तमो विशति यत्पुमान् १६ वासुदेवे भ
गवति तद्भक्तेषु च साधुषु प्राप्तो भावं परं विश्वं येनेदं लोष्टवत्स्मृतं १७ स वै मनः कृष्णपदारविंदयोर्वचांसि वैकुं
ठगुणानुवर्णने करौ हरेर्मंदिरमार्जनादिषु श्रुतिं चकाराच्युतसत्कथोदये १८ मुकुंदलिंगालयदर्शने दृशौ
तद्भृत्यगात्रस्पर्शेंगसंगमं घ्राणं च तत्पादसरोजसौरभे श्रीमत्तुलस्या रसनां तदर्पिते १९ पादौ हरेः क्षेत्रपदा
नुसर्पणे शिरो हृषीकेशपदाभिवंदने कामं च दास्ये न तु कामकाम्यया यथोत्तमश्लोकजनाश्रया रतिः २० एवं
सदा कर्मकलापमात्मनः परेधियज्ञे भगवत्यधोक्षजे सर्वात्मभावं विदधन्महीमिमां तन्निष्ठविप्राभिहितः शशास ह

प्राप्तः येन भावेनेदं विश्वं लोष्टवदसारं स्मृतं १७ भक्तिमेव सर्वेन्द्रियाणां भगवत्परत्वकथनेन प्रपंचयति स वै मन इति त्रिभिः श्रुति
श्रोत्रं अच्युतस्य सत्कथानामुदये श्रवणे चकार तस्य सर्वत्रान्वयः १८ मुकुंदस्य लिंगानां आलयानि स्थानानि तेषां दर्शने दृशौ नेत्रे श्रीम
त्याः तुलस्याः तत्पादसरोजेन यत्सौरभं तस्मिन् तदर्पिते तत्समर्पिते अन्नादौ १९ कामं संकल्पं दास्ये सेवायां तत्प्रसादस्वीकारात् न तु कामकाम्यया विषये
च्छया यथा उत्तमश्लोकजनाश्रया रतिर्यथा भवेत्तथा अनेन न तु केवलं भावमात्रं इत्युक्तं २० सर्वात्मेति भावो भावना यस्मिन् तत् आत्मनः स्व
स्य कर्मकलापं सम्यक् भगवति विदधन् समर्पयन् तन्निष्ठैर्भगवन्निष्ठैर्विप्रैः अभिहितः सन् महीं शशास तथा मासेनाधिकृत एवापि यथावद्दर्शितः २१

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

श्रीः
भा॰ न
टी॰
८

किंचयज्ञाधिष्ठातारमीश्वरमश्वमेधैरीजे आराधयामास महाविभूत्याउपचितान्यंगानि दक्षिणाश्चयेषुतैः वसिष्ठादिभिश्चहेतु
भूतैर्विस्तृतैः धन्वनि देशे सरस्वतीमभिस्रोतं ततस्याः प्रतिलोममित्यर्थः २२ किंचक्रतुषु सदस्यादयोगीर्वाणैः सह
भूषणादिभिः तुल्यरूपायस्यदृश्यन्त सम्यक्प्रकाशित वस्त्रयेनान्वयः नवृद्देवानानिमेषाभावादेलक्षणमपश्यतः श्रुतेनिमिषाश्च व्यदृश्यन्तेन
निमिषवतीतिव्याख्यानं श्रद्धयदृष्टानाह्नकोनततपानिमेषाप्रमादिभावः २३ यस्यप्रदीयमनुजैरपिस्वर्गोनप्रार्थितः तस्यतत्का
वार्ता २४ आत्मास्वर्गप्रार्थनशंकापियस्यतः मुकुन्दं हृदि पश्यतस्तान्कामाः विषयान्समर्द्धयन्ति न हर्षयन्ति कथंभूताः स्वारा

ईजेश्वमेधैरधियज्ञमीश्वरं महाविभूत्योपचितांगदक्षिणैः ततैर्वसिष्ठासितगौतमादिभिर्धन्वन्यभिस्रोतमसौ स
रस्वती २२ यस्यक्रतुषुगीर्वाणैः सदस्याऋत्विजोजनाः तुल्यरूपाश्चानिमिषाव्यदृश्यन्तसुवाससः २३ स्वर्गो
नप्रार्थितोयस्यमनुजैरमरप्रियः शृण्वद्भिरुपगायद्भिरुत्तमश्लोकचेष्टितं २४ समर्द्धयन्तितान्कामाः स्वारा
ज्यपरिभाविताः दुर्लभानपिसिद्धानांमुकुन्दंहृदिपश्यतः २५ सइत्थंभक्तियोगेनतपोयुक्तेनपार्थिवः स्व
धर्मेणहरिंप्रीणन्सर्वान्कामान्शनैर्जहौ २६ गृहेषुदारेषुसुतेषुबन्धुषुद्विपोत्तमस्यन्दनवाजिवस्तुषु अक्षय्य
रत्नाभरणायुधादिष्वनन्तकोशेष्वकरोदसन्मतिं २७ तस्माअदाद्धरिश्चक्रंप्रत्यनीकभयावहं एकान्तभक्ति
भावेनप्रीतोभृत्याभिरक्षणं २८ आरिराधयिषुःकृष्णंमहिष्यातुल्यशीलया युक्तःसांवत्सरंवीरोदधारद्वाद॰
शीव्रतं २९ व्रतान्तेकार्तिकेमासित्रिरात्रंसमुपोषितः स्नातःकदाचित्कालिन्द्यांहरिंमधुवनेर्चयत् ३० महा
भिषेकविधिनासर्वोपस्करसंपदा अभिषिच्याम्बराकल्पैर्गन्धमाल्यार्हणादिभिः ३१ तद्गतान्तरभावेनपूजया॰
मासकेशवं ब्राह्मणांश्चमहाभागान्सिद्धार्थानपिभक्तितः ३२

ज्येन स्वरूपसुखेन परिभाविताः प्रतिष्ठापिताः अत एव सिद्धानामपि दुर्लभा यानिति पाठे यान् मनुजान् स्वाराज्येन तयापि हितौ
यौर पाठे मनुष्याणां विशेषणं यमिति पाठे यमेववीषयपश्यतामिति पाठे सिद्धानां विशेषणं एवं श्रीभगवदाराधनमात्रपरत्व
सकामायुपेत्यान्नैवविरमिति उपसंहरति सइत्थमिति द्वाभ्यां २७ नन्वेवंभूते सो कथं प्रतिपन्नान् जयेत्तत्राह तस्मा इति
२८ तदेवं तस्यैवमत्यादिकं हरिभक्तिबोध्ना ब्रह्मदंडो यदनपाभूदिति यदुक्तं तदेव द्वादशीव्रतनिष्ठाकथयन्नाह आरिराधयि
षुरित्यादिना यावदध्यायसमाप्तिः २९ अर्चयत् अडागमाभावआर्षः ३० ३१ ब्राह्मणांश्चपूजयामाससिद्धान् प्राप्तकामान्
सृजानप्राप्तानपि ३२ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

रूप्यांघ्रीणां रूप्यखुराणां पयःशीलादियासां तासां ३३ न्यर्बुदानि षट् षष्टिकोटीः ३४ तर्हि तदैव दुर्वासा अतिथिः साक्षात्स्वयं दोऽभूत् स आनर्च अर्चितवान् अभ्यवहाराय भोजनाय आवश्यकं नैयमिकं माध्याह्निकं कर्म कर्तुं गतः बृहद्ब्रह्म ३७ ३८ धर्मसंकटमेवाह यद्यतः ब्राह्मणातिक्रमो दोषः अधर्मो द्वादश्यामपारणेऽपि दोषः अतः केवलं यत्कृत्वा यस्मिन्कृते ३९ एवं द्विजैः

गवां रुक्मविषाणीनां रूप्यांघ्रीणां सवाससां पयःशीलवयोरूपवत्सोपस्करसंपदा ३३ प्राहिणोत्साधुविप्रेभ्यो गृहेषु न्यर्बुदानि षट् भोजयित्वा द्विजानग्रे स्वाद्वन्नं गुणवत्तमं ३४ लब्धकामैरनुज्ञातः पारणायोपचक्रमे तस्य तर्ह्यतिथिः साक्षाद्दुर्वासा भगवानभूत् ३५ तमानर्चातिथिं भूयः प्रत्युत्थानासनार्हणैः ययाचेऽभ्यवहाराय पादमूलमुपागतः ३६ प्रतिनंद्य स तां याच्ञां कर्तुमावश्यकं गतः निममज्ज बृहद्ध्यायन्कालिन्दीसलिले शुभे ३७ मुहूर्तार्द्धावशिष्टायां द्वादश्यां पारणं प्रति चिन्तयामास धर्मज्ञो द्विजैस्तद्धर्मसंकटे ३८ ब्राह्मणातिक्रमे दोषो द्वादश्यां यदपारणे यत्कृत्वा साधु मे भूयादधर्मो वा न मां स्पृशेत् ३९ अंभसा केवलेनाथ करिष्ये व्रतपारणं प्राहुरब्भक्षणं विप्रा ह्यशितं नाशितं च तत् ४० इत्यपः प्राश्य राजर्षिश्चिन्तयन्मनसाच्युतं प्रत्यचष्ट कुरुश्रेष्ठ द्विजागमनमेव सः ४१ दुर्वासा यमुनाकूलात्कृतावश्यक आगतः राज्ञाभिनंदितस्तस्य बुबुधे चेष्टितं धिया ४२ मन्युना प्रचलद्गात्रो भ्रुकुटीकुटिलाननः बुभुक्षितश्च सुतरां कृतांजलिमभाषत ४३ अहो अस्य नृशंसस्य श्रियोन्मत्तस्य पश्यत धर्मव्यतिक्रमं विष्णोरभक्तस्येशमानिनः ४४ यो मामतिथिमायातमातिथ्येन निमन्त्र्य च अदत्त्वा भुक्तवांस्तस्य सद्यस्ते दर्शये फलं एवं ब्रुवाण उत्कृत्य जटां रोषविदीपितः ४५ तया स निर्ममे तस्मै कृत्यां कालानलोपमां ४६ तामापतंतीं ज्वलतीमसिहस्तां पदा भुवं वेपयंतीं समुद्वीक्ष्य न चचाल पदान्नृपः ४७ प्राग्दिष्टं भृत्यरक्षायां पुरुषेण महात्मना ददाह कृत्यां तां चक्रं क्रुद्धाहिमिव पावकः ४८ तदभिद्रवदुद्वीक्ष्य स्वप्रयासं च निष्फलं दुर्वासा दुद्रुवे भीतो दिक्षु प्राणपरीप्सया
४९ तमन्वधावद्भगवद्रथांगं दावाग्निरुद्धूतशिखो यथाहिं तथानुषक्तं मुनिरीक्षमाणो गुहां विविक्षुः

सह विचार्य निश्चित्य आह अंभसेति व्रतस्य पारणं समापनं तदशितं प्राहुः अशितं नेति वा उक्तः अतः स्तुतिस्मृत्योः प्राप्तिः तत्रैवाशितं नैवाशितमिति ४० प्रत्यचष्ट प्रत्यैक्षत ४१ प्रचलत्कंपमानं गात्रं यस्य भ्रुकुटिलमाननं यस्य ४२ ४४ ४५ ४६ ४७ क्रुद्धमहिं पावको दवाग्निरिव ४८ निष्फलमुद्वीक्ष्य ४९ अनुषक्तं पृष्ठतः संसक्तं मेरोः गुहां विविक्षुर्यथावत् ५० ॐ नमो भगवते वासुदेवाय

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

श्रीः
भा·न·
टी·
७

अरणमेषमाणः शरणमिच्छन् अजिततेजसः हरेश्चक्रात् ५२ एतत्सर्वं यस्य भ्रूभंगमात्रेण तिरोभविष्यति कदा क्रीडयावसा
नेन द्विपरार्द्धसंज्ञे काले ५३ अतो वयं सर्वे यस्य नियमं आज्ञां प्रपन्नाः प्राप्ताः सन्तो लोकहितं यथा भवत्येवं तन्नियमं मूर्द्ध्न्य
र्पितं वहामः अतस्तद्रोहिणो रक्षितुं न समर्था इति शेषः यद्वा नित्यमेव स्यात् ५४ श्रीरुद्रोपि प्रत्याचष्टे वयमिति

दिशो नभः क्ष्मां विवरान्समुद्रांल्लोकान्सपालांस्त्रिदिवं गतः सः यतो यतो धावति तत्र तत्र सुदर्शनं दुष्प्रसहं दद
र्श ५१ अलब्धनाथः स यदा कुतश्चित्संत्रस्तचित्तोऽरणमेषमाणः देवं विरिंचं समगाद्विधातस्त्राह्यात्मयोनेऽजित
तेजसो मां ५२ ब्रह्मोवाच स्थानं मदीयं सहविश्वमेतत्क्रीडावसाने द्विपरार्द्धसंज्ञे भ्रूभंगमात्रेण हि संदिधक्षोः का
लात्मनो यस्य तिरोभविष्यति ५३ अहं भवो दक्षभृगुप्रधानाः प्रजेशभूतेशसुरेशमुख्याः सर्वे वयं यन्नियमं प्र
पन्ना मूर्ध्न्यर्पितं लोकहितं वहामः ५४ प्रत्याख्यातो विरिंचेन विष्णुचक्रोपतापितः दुर्वासाः शरणं यातः शर्वं कै
लासवासिनं ५५ श्रीरुद्र उवाच वयं न तात प्रभवाम भूम्नि यस्मिन्परेऽन्येऽप्यजजीवकोशाः भवंति काले न भवं
ति हीदृशाः सहस्रशो यत्र वयं भ्रमामः ५६ अहं सनत्कुमारश्च नारदो भगवानजः कपिलोऽपान्तरतमो देवलो ध
र्म आसुरिः ५७ मरीचिप्रमुखाश्चान्ये सिद्धेशाः पारदर्शनाः विदाम न वयं सर्वे यन्मायां माययावृताः ५८ तस्य वि
श्वेश्वरस्येदं शस्त्रं दुर्विषहं हि नः तमेव शरणं याहि हरिस्ते शं विधास्यति ५९ ततो निराशो दुर्वासाः पदं भगवतो य
यौ वैकुंठाख्यं यदध्यास्ते श्रीनिवासः श्रिया सह ६० सन्दह्यमानोऽजितशस्त्रवह्निना तत्पादमूले पतितः सवेपथुः
आहाच्युतानंत सदीप्सित प्रभो कृतागसं मावहि विश्वभावन ६१ अजानता ते परमानुभावं कृतं मयाघं भवतः प्रिया
णां विधेहि तस्यापचितिं विधातर्मुच्येत यन्नाम्न्युदिते नारकोपि ६२ श्रीभगवानुवाच अहं भक्तपराधीनो ह्यस्वतंत्र
इव द्विज साधुभिर्ग्रस्तहृदयो भक्तैर्भक्तजनप्रियः ६३

वतोर्भिः भूम्नि महति महत्त्वमेवाह यस्मिन्परमेश्वरे अजा ब्रह्माणः त एव जीवाः तेषां कोशा उपाधिभूता ब्रह्मांडविग्रहाः ईदृशा
इत्युपमानिषेधः तादृशमाणा अन्येपि भवंति जायंते न भवंति प्रलीयंते च यत्र येषु ब्रह्मांडेषु लोकेशाभिमानिनो वयं भ्रमामः ५६ न चास्माकं स्वातंत्र्य
मः अतः न वयं मितिपारदर्शिनः सर्वज्ञा अपि यस्य मायां न विद्मः ५७ हे सदा भीप्सितमाम् अवहि पाहि ५८ ६१ अपराधे
निर्दयस्य मे प्रार्थ्यते अजानतेति अघं अपराधं तस्य अपचितिं निष्कृतिं मह्यं देहि निष्कृतिं न पश्यामीति चेत्तत्राह यस्य तव नाम्नि की
र्तिते नारकस्यापि मुच्येत तस्य तव किमशक्यमिति भावः ६२ ६३

७

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

नश्राश्यामेनसंहरयामि ६४ इमंपरंचलोकंहित्वा ६५ ६६ प्रतीतंप्राप्तमपि ६७ ६८ आत्मनस्तवैवाभिचारोहिंसायतो
भूत तमेवयाहिअशिवमनर्थं ६९ तपोविद्यासम्पन्नस्यममकथमनर्थः ममजनीतिमास्मविस्मयंकार्षीरित्याहतपइ॰

नाहमात्मानमाशासेमद्भक्तैःसाधुभिर्विना श्रियंचात्यंतिकींब्रह्मन्येषांगतिरहंपरा ६४ मयिनिर्बद्धहृदयाःसा
धवःसमदर्शनाः वशीकुर्वंतिमांभक्त्यासत्स्त्रियःसत्पतिंयथा ६६ मत्सेवयाप्रतीतंचसालोक्यादिचतुष्टयं
नेच्छंतिसेवयापूर्णाःकुतोन्यत्कालविद्रुतं ६७ साधवोहृदयंमह्यंसाधूनांहृदयंत्वहं मदन्यत्तेनजानंतिनाहंते
भ्योमनागपि ६८ उपायंकथयिष्यामितवविप्रशृणुष्वतत् अयंह्यात्माभिचारस्तेयतस्तंयातुवैभवान् सा
धुषुप्रहितंतेजःप्रहर्तुःकुरुतेशिवं तपोविद्याचविप्राणांनिःश्रेयसकरेउभे तेएवदुर्विनीतस्यकल्पेतेकर्तुर
न्यथा ७० ब्रह्मंस्तद्गच्छभद्रंतेनाभागतनयंनृपं क्षमापयमहाभागंततःशांतिर्भविष्यति ७१ इतिश्री भा
व न म येअंबरीषचरितेचतुर्थोध्यायः ४ श्रीशुकउवाच एवंभगवतादिष्टोदुर्वासाश्चक्रतापितः अंबरीष
मुपावृत्यतत्पादौदुःखितोग्रहीत् १ तस्यसोद्यममावीक्ष्यपादस्पर्शविलज्जितः अस्तावीत्तद्धरेरस्त्रंकृपया
पीडितोभृशं २ त्वमग्निर्भगवान्सूर्यःत्वंसोमोज्योतिषांपतिः त्वमापःत्वंक्षितिर्व्योमवायुर्मात्रेंद्रियाणिच
३ सुदर्शननमस्तुभ्यंसहस्राराच्युतप्रिय सर्वास्त्रघातिन्विप्रायस्वस्तिभूयादिडस्पते ४ त्वंधर्मस्त्वमृतंस
त्यंत्वंयज्ञोखिलयज्ञभुक् त्वंलोकपालःसर्वात्मात्वंतेजःपौरुषंपरम् ५ ॥ ॥
येदारागारपुत्राप्तान्प्राणान्वित्तमिमंपरम् हित्वामांशरणंयाताःकथंतांस्त्यक्तुमुत्सहे ६५

ति ७१ इति भावा टीका यां न स्कं च तु ध्यायः ४ पंचमेविष्णुचक्रेणतप्तस्यप्राणसंकटात् दुर्वासा
बलितस्तेनतद्यातद्भुतमीर्यते सउद्यममितिछेदःसलोपःपादस्पर्शार्थः २ ज्योतिषांनक्षत्राणांपतिःसोमःत्वं
मात्राणिइंद्रियाणिचत्वच्छक्त्यैवाग्न्यादयःस्वस्वकार्यंकुर्वंतीत्यर्थः ३ सहस्रंअराधारायस्यहेसहस्रारस्वस्तिशरणं
भूयाःइडस्पतेपृथ्वीपते ४
राम हस

ज्ञानमिव लक्षणं तस्य युक्तमेवेत्याह तेन धर्म इति निवर्तते यमतिस्तत्तितित्याह यो रूपं पुरुषस्येश्वरस्य परं तेजः सामर्थ्यं वै
श्वर्यं भावः स पतितेत्यादिष्कृतिषसिद्धे भगवतः योभने दर्शनं हि सुदर्शनेन तत्पवेशं सर्वं ज्ञाते तत्रतस्त्वमेव सर्वात्मेति दे
नामयदुतकर्माणं तांकः स्तोतं समर्थः अतस्त्वमेकं केवलं नमोऽस्तु तुभ्यं इत्यन्वयः अद्भुतकर्मन्नमेवाह अखिलानां धर्मा
णां सेतवे मर्यादारूपाय अतएवाधर्मशीलानामसुराणां धूमकेतवे दाहकाय त्रैलोक्यं गोपायतीति तथा विशुद्धमत्युज्ज्व
लं वर्चस्तेजो यस्य तस्मै ८ तदेव प्रपंचयति त्वत्तेजसेति द्वाभ्यां सूर्यादीनां प्रकाशश्च त्वय्येव त्वद्व्याप्तेः प्रकाश्यते अतिदुरूपम्

नमः सुनाभाखिलधर्मसेतवे ह्यधर्मशीलासुरधूमकेतवे त्रैलोक्यगोपाय विशुद्धवर्चसे मनोजवायाद्भुतक
र्मणे गृणे ८ त्वत्तेजसा धर्ममयेन संहृतं तमः प्रकाशश्च धृतो महात्मना दुरत्ययस्तव महिमा गिरां पते त्वद्रूपमेत
त्सदसत्परावरम् ९ यदा विसृष्टस्त्वमनंजनेन वै बलं प्रविष्टोऽजितदैत्यदानवं बाहूदरोरुंघ्रिशिरोधराणि वृ
श्चन्नजस्रं प्रधने विराजसे ८ स त्वं जगत्त्राण खलप्रहाणये निरूपितः सर्वसहो गदाभृता विप्रस्य चास्मत्कुलदैव
हेतवे विधेहि भद्रं तदनुग्रहो हि नः ५ यद्यस्ति दत्तमिष्टं वा स्वधर्मो वा स्वनुष्ठितः कुलं नो विप्रदैवं चेद्द्विजो भव
तु विज्वरः १० यदि नो भगवान्प्रीत एकः सर्वगुणाश्रयः सर्वभूतात्मभावेन द्विजो भवतु विज्वरः ११ शुक उवा
च ११ इति संस्तुवतो राज्ञो विष्णुचक्रं सुदर्शनं अशाम्यत्सर्वतो विप्रं प्रदहद्राजयाच्ञया १२ स मुक्तोऽस्त्राग्नितापे
न दुर्वासाः स्वस्तिमांस्ततः प्रशशंस तमुर्वीशं युञ्जानः परमाशिषः १३ दुर्वासा उवाच अहो अनंतदासानां मह
त्त्वं दृष्टमद्य मे कृतागसोऽपि यद्राजन्मंगलानि समीहसे १४ दुष्करः को नु साधूनां दुस्त्यजो वा महात्मनां यैः
संगृहीतो भगवान्सात्वतामृषभो हरिः १५ यन्नामश्रुतिमात्रेण पुमान्भवति निर्मलः तस्य तीर्थपदः किं वा
दासानामवशिष्यते १६ राजन्ननुगृहीतोऽहं त्वयातिकरुणात्मना मदघं पृष्ठतः कृत्वा प्राणा यन्मेऽभिरक्षिताः

९ हे अजित अनंजनेन श्रीहरिणा यदा विसृष्टः त्वं तदा दैत्यदानवानां बलं प्रविष्टः सन् तेषां बाहूदरादीन् वृश्चन् विराजसे पाठांत
रे ऽजिता इत्यसाननवायस्मिन्नतहनत्वं यदेन सन्धियाषेः ८ किं च भगवत्प्रयुक्तेन खलानां मेदध्रं कार्यं साधयतस्तव तावी
यात्मनात्मविप्रकर्षणीयाः अतो विप्रस्त्वत्तो रक्षणीय इत्याह स त्वमिति हे जगत्त्राण स एवं भूतः खलानामेव प्रहरणे
त्वं निरूपितो नियुक्तः अतोऽस्मत्कुलस्य दैवहेतवे भाग्याय लाभाय विप्रस्य भद्रं विधेहि तदेव नोऽनुग्रहः सर्वसहस्त्वमतो दानविप्र

[illegible]

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

राजन्नित्यादि श्लोकद्वयं शुकोक्तिः श्रीतोऽस्मीति श्लोकद्वयं पुनस्तु विप्रोक्तिः ॥ १८ ॥ १९ ॥ आत्मनि मेधा येन तेन आतिथ्येन ॥ २० ॥ भूरियं तव
स्योजन्नः कीर्तयिष्यति ॥ २१ ॥ २२ ॥ तस्य धैर्यातिशयमाह गत इति मुनिर्यावता नागतः तावत्संवत्सरोऽतिक्रान्त इति ॥ २३ ॥ द्विजस्यो
पयोगेन भोजनेनातिपवित्रमाहरत् बुभुजे स्ववीर्यं च धैर्यादिलक्षणं परानुभावं भागवतः प्रभावं मेने ॥ २४ ॥ एवंविधानेके

राजानमकृताहारः प्रत्यागमनकांक्षया । चरणावुपसंगृह्य प्रसाद्य समभोजयत् ॥ १८ ॥ सोऽशित्वाऽऽदृतमानीत
मातिथ्यं सार्वकामिकं । तृप्तात्मा नृपतिं प्राह भुज्यतामिति सादरं ॥ १९ ॥ प्रीतोऽस्म्यनुगृहीतोऽस्मि तव भागवतस्य वै
दर्शनस्पर्शनालापैरातिथ्येनात्ममेधसा ॥ २० ॥ कर्मावदातमेतत्ते गायन्ति स्वःस्त्रियो मुहुः । कीर्तिं परमपुण्यां च
कीर्तयिष्यति भूरियं ॥ २१ ॥ श्रीशुक उवाच । एवं संकीर्त्य राजानं दुर्वासाः परितोषितः । ययौ विहायसाऽऽमन्त्र्य ब्रह्मलोक
महैतुकम् ॥ २२ ॥ संवत्सरोऽत्यगात्तावद्यावता नागतो गतः । मुनिस्तद्दर्शनाकांक्षो राजाऽब्भक्षो बभूव ह ॥ २३ ॥ गतेऽथ
दुर्वाससि सोऽम्बरीषो द्विजोपयोगातिपवित्रमाहरत् । ऋषेर्विमोक्षं व्यसनं च बुद्ध्वा मेने स्ववीर्यं च परानुभावं ।
२४ एवंविधानेकगुणः स राजा परात्मनि ब्रह्मणि वासुदेवे । क्रियाकलापैः समुवाह भक्तिं ययाऽऽविरिंच्यान्निरयां
श्चकार ॥ २५ ॥ अथाम्बरीषस्तनयेषु राज्यं समानशीलेषु विसृज्य धीरः । वनं विवेशात्मनि वासुदेवे मनो दधद्ध्वस्त
गुणप्रवाहः ॥ २६ ॥ इत्येतत्पुण्यमाख्यानमम्बरीषस्य भूपतेः । संकीर्तयन्ननुध्यायन्भक्तो भगवतो भवेत् ॥ २७ ॥
इति भाग नवम स्कं पंच ध्यायः ५ श्रु उ व विरूपः केतुमान् शंभुरम्बरीषसुतास्त्रयः । विरू
पात्पृषदश्वोऽभूत्तत्पुत्रस्तु रथीतरः ॥ १ ॥ रथीतरस्याप्रजस्य भार्यायां तन्तवेऽर्थितः । अंगिरा जनयामास ब्रह्म
वर्चस्विनः सुतान् ॥ २ ॥ एते क्षेत्रप्रसूता वै पुनस्त्वांगिरसाः स्मृताः । रथीतराणां प्रवराः क्षत्रोपेता द्विजातयः ॥ ३ ॥

गुणाः परमस्य साविरिंच्यान् विरिंचिपदसहितान् भोगान् निरयप्रायानपश्यदित्यर्थः ॥ २५ ॥ इति वार्थे नवम पंचमोऽध्यायः
५ षष्ठेऽम्बरीषस्य वंशमुक्त्वा ततः परं । षष्ठाद्यष्टभिरध्यायैरिक्ष्वाकोर्वंश उच्यते ॥ तत्र षष्ठे शशादादिर्मान्धातान्तो निरूप्यते
प्रसंगात्सौभरेर्गाथा मान्धातृतनयापतेः ॥ तंतवे संतानार्थमंगिरसा जनिताः एते क्षेत्रप्रसूताः क्षेत्रस्वामिनो रथीतरस्य गोत्राः
मतः अंगिरसो वीर्येण प्रसूतत्वादांगिरसाश्च पुनः रथीतराणां मुख्या अन्येषां जातानां प्रवराः मुख्याः
स्मृताः यतः क्षत्रोपेताः ब्राह्मणा इत्यर्थः ॥ ३ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

तदेवं मनोर्दशसु पुत्रेषु पृषध्रकविस्तु विरक्तत्वान्न वंशप्रवर्तकौ करूषादीनां च सप्तानां वंशास्तावदनुक्रमेणोक्ताः इदानी
मतिविततमिक्ष्वाकोर्वंशमाह क्षुवतस्त्वित्यादिना यावत्सोमवंशप्रस्तावः क्षुवतः कुर्वतो मनोर्घ्राणतो जज्ञे छिक्कायाजननया मा
सद्यापुत्रानिति प्रवीतो वा कृत्याभिप्रायेणेति द्रष्टव्यं पुत्राणां शते ज्येष्ठाः ४ आर्यावर्तः पुण्यभूमिर्मध्यं विन्ध्यहिमालययोः त
स्मिन्पुरस्तात्समुद्रपर्यन्तमण्डलविभागेन पंचविंशतिर्नृपा अभवन् हे नृप त एव पश्चाच्च पंचविंशतिः मध्ये त्रयो ज्येष्ठास्त्रयः
अपरे तु अन्यत्र दक्षिणोत्तरादिषु ५ विकुक्षिरेव शशाद इति विख्यात इति च वक्ष्यति तत्र हेतुमाह स एकदेति चतुर्भिः ६

क्षुवतस्तु मनोर्जज्ञे इक्ष्वाकुर्घ्राणतः सुतः तस्य पुत्रशतं ज्येष्ठा विकुक्षिनिमिदण्डकाः ४ तेषां पुरस्तादभवन्ना
र्यावर्ते नृपा नृप पंचविंशति पश्चाच्च त्रयो मध्येऽपरेऽन्यतः ५ स एकदाष्टकाश्राद्धे इक्ष्वाकुः सुतमादिशत् मांस
मानीयतां मेध्यं विकुक्षे गच्छ मा चिरं ६ तथेति स वने गत्वा मृगान्हत्वा क्रियार्हणान् श्रान्तो बुभुक्षितो वीरः श
शं चाददपस्मृतिः ७ शेषं निवेदयामास पित्रे तेन च तद्गुरुः चोदितः प्रोक्षणायाह दुष्टमेतदकर्मकं ८ ज्ञात्वा
पुत्रस्य तत्कर्म गुरुणाभिहितं नृपः देशान्निःसारयामास सुतं त्यक्तविधिं रुषा ९ स तु विप्रेण संवादं ज्ञापके
न समाचरन् त्यक्त्वा कलेवरं योगी स तेनावाप यत्परम् १० पितर्युपरतेऽभ्येत्य विकुक्षिः पृथिवीमिमां शासदी
जे हरिं यज्ञैः शशाद इति विश्रुतः ११ पुरंजयस्तस्य सुत इन्द्रवाह इतीरितः ककुत्स्थ इति चाप्युक्तः शृणु नामा
नि कर्मभिः १२ कृतान्त आसीत्समरो देवानां सह दानवैः पार्ष्णिग्राहो वृतो वीरो देवैर्दैत्यपराजितैः वचनाद्देवदे
वस्य विष्णोर्विश्वात्मनः प्रभो वाहनत्वे वृतस्तस्य बभूवेन्द्रो महावृषः १४ स सन्नद्धो धनुर्दिव्यमादाय विशिखाञ्
छितान् स्तूयमानः समारुह्य युयुत्सुः ककुदि स्थितः १५ तेजसाप्यायितो विष्णोः पुरुषस्य परात्मनः प्रतीच्यां दि
शि दैत्यानां न्यरुणत्त्रिदशैः पुरं १६

क्रियार्हणान् श्राद्धार्हान् शशादेत्यभक्षयत् ७ तद्गुरुर्वसिष्ठः प्रोक्षणाय श्राद्धोचितसंस्काराय ८ त्यक्तो विधिः सदाचारो
येन तं ९ स तु इक्ष्वाकुर्ज्ञापकेन वसिष्ठेन राज्यभोगेन किं कार्यं योगी सन् तेन योगेन कलेवरं त्यक्त्वा मोक्षं प्राप्य तत्परमवाप १०
शासत्पालयन् हरिमीजे ११ दैत्यपुरस्य जयात्पुरंजयः इन्द्रो वाहो यस्येतीन्द्रवाहः ककुदि स्थितत्वात्ककुत्स्थ इति
च शशादस्य तस्य यानि नामानि तत्कर्मनिमित्तानि १२ तान्येव व्याचष्टे आह कृतान्त इति सप्तभिः कृतेति विभूमतयतीति तर्थो
पार्ष्णिग्राहः सहायः १३ इन्द्रो यदिममवाहनेस्यात्तर्हि दैत्यान्हनिष्यामीति तेन वाहनत्वेन वृतः सन्निन्द्रो लज्जया तदनङ्गीकृर्वन्विः

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

१८ येभिमुखंचयस्तान्प्रमदं दृष्ट्वा यितं सदेहानेव भक्षयन्नयदित्यर्थः तत्र दृष्ट्वा प्रत्येद्वृद्धवः स्वमालयं पातालं १९ इतिपत्नेः कर्मभिः पुरंजयादिनामभिराहूतः व्याहृतः प्रोक्तं तदेव आहूत इत्यर्थः १९ २० श्रावस्तिः श्रावः तस्य पुत्रः कुवलयाश्वक एव धुन्धुमार २१ तत्र कारणमाह यतस्त्रिकेति नामकविंशत्या सहस्रैर्हतः सन् हतवान् २२ धुन्धुमारइतिचेति चकारस्यान्वयः २४ प्रयतनस्यान्विता भानदृश्याश्वः २५ भार्याग्राम्यानेन सह ग्रस्य पुत्रार्थं मिंद्रदैवत्यामिष्टिं सवर्तयामासः तेनाप्यत्वं

तेन भार्यावाभूत्सधनेन मुलेवो महर्षीणां यमाय मन्त्रेण पयदेत्यान्यभियग्रुपूर्वे १७ तस्येषु पाताभिमुखेषुगांताग्नि
मिवाग्नाणं विसृज्य दद्दुबुर्देत्या हन्यमानाः स्वमालयं १८ जित्वा सहन्यतेमर्वसप्रीकं वत्रपाणये प्रत्ययच्छ
त्पराजयीविति नामभिराहूतः १९ पुरंजयस्य पुत्रोभूदनेनस्तस्य तः पृथुः विश्वरन्धिस्ततस्त्वंद्रो युवनाश्वस्तत्सु
तः २० श्रावस्तस्तस्तेतायेन श्रावस्तीनिर्ममे पुरी बृहदश्वस्तश्रावस्तिः ततः कुवलयाश्वकः २१ यः प्रियार्थ
मुतंकस्य धुन्धुनामासुरं बली सुतानामेकविंशत्या सहस्रैरहनद्वृतः २२ धुन्धुमार इति ख्यातस्तत्सुतास्ते
च जज्वलुः धुन्धोर्मुखाग्निना सर्वे त्रय एवावशेषिताः २३ दृढाश्वः कपिलाश्वश्च भद्राश्व इति भारत दृढाश्वपुत्रो
हर्यश्वो निकुम्भस्तत्सुतः स्मृतः २४ बर्हणाश्वो निकुम्भस्य कृशाश्वोथास्य सेनजित् युवनाश्वोभवत्तस्य सोनप
त्यो वनं गतः २५ भार्याशतेन निर्विण्ण ऋषयोस्य कृपालवः इष्टिं स्म वर्तयांचक्रुरैन्द्रीं ते सुसमाहिताः २६ राजा
तद्यज्ञसदनं प्रविष्टो निशि तर्षितः दृष्ट्वा शयानान्विप्रांस्तान्पपौ मन्त्रजलं स्वयं २७ उत्थितास्ते निशम्याथ व्युद
कं कलशं प्रभो पप्रच्छुः कस्य कर्मेदं पीतं पुंसवनं जलं २८ राज्ञा पीतं विदित्वाथ ईश्वर प्रहितेन ते ईश्वराय न
मश्चक्रुरहो दैवबलं बलं २९ ततः काल उपावृत्ते कुक्षिं निर्भिद्य दक्षिणं युवनाश्वस्य तनयश्चक्रवर्ती जजान
ह ३० कं धास्यति कुमारोयं स्तन्ये रोरूयते भृशं मां धाता वत्स मा रोदीरितीन्द्रो देशिनीमदात् ३१

२९ तदेवाह पराजेति षड्भिः तर्षितः सन्नुजलार्थं प्रविष्टः मन्त्राभिमन्त्रितं जलं पत्न्यै देयं स्वयं पपौ व्युदकं निरुदकं प्रभव
ने पुत्रोत्पत्तिकारणं २८ अहो दैवबलमेव मुख्यं बलं पुरुषबलं न किंचिदिति वदन्त ईश्वराय नमस्कारं चक्रुः २९ ३०
कं धास्यति कं धास्यतीति रुदिते सति तत्स्तनाभिप्रायः आनायित इन्द्रो
मां धाता हे वत्स मा रोदीरिति वदन्देशिनीं तर्जनीमदादित्यर्थः ३१

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

श्रीः
भा॰ न॰
टी॰
९

तस्य पिता युवनाश्वो भिन्नकुक्षिरपि न ममार किं तु कालेनैव तपसा सिद्धिमन्वगात् मान्धातुर्महिमानमाह त्रसद्द-
स्युरिति षड्भिः रावणादयो जन्तू यस्मात्सो धाता रंस्यवउद्विग्नाः कुम्भिनासतः त्रसन्ति अतइन्द्रो यस्य त्रसद्दस्युरिति नाम विदधे समा-
न्याताम्भवनीमेकः शशासेत्युत्तरेणान्वयः ३३ अच्युतस्य तेजसा अच्युततेजसा तेनैवा ३४ आत्मविदपि सः यज्ञैर्विष्णुमीजे
तमेव विशिनष्टि सर्वदेवमयमिति सार्द्धेन ३५ ३६ प्रतितिष्ठति अस्तं गच्छति प्रसंगात्सौभरेश्चरितमाह तेषामिति या-

न ममार पिता तस्य विप्रदेवप्रसादतः युवनाश्वोऽथ तत्रैव तपसा सिद्धिमन्वगात् ३२ त्रसद्दस्युरितीन्द्रोऽङ्ग विद-
धे नाम यस्य वै यस्मात्त्रसन्ति ह्युद्विग्ना दस्यवो रावणादयः ३३ यौवनाश्वोऽथ मान्धाता चक्रवर्त्यवनिं प्रभुः स-
प्तद्वीपवतीमेकः शशासाच्युततेजसा ३४ ईजे च यज्ञं क्रतुभिरात्मविद्भूरिदक्षिणैः सर्वदेवमयं देवं सर्वात्मक-
मतीन्द्रियं ३५ द्रव्यं मन्त्रो विधिर्यज्ञो यजमानस्तथर्त्विजः धर्मो देशश्च कालश्च सर्वमेतद्यदात्मकं ३६ यावत्सू-
र्य उदेति स्म यावच्च प्रतितिष्ठति सर्वं तद्यौवनाश्वस्य मान्धातुः क्षेत्रमुच्यते ३७ शशबिन्दोर्दुहितरि बिन्दुमत्यामधा-
न्नृपः पुरुकुत्सम्मम्बरीषं मुचुकुन्दं च योगिनं ३८ तेषां स्वसारः पंचाशत्सौभरिं वव्रिरे पतिं यमुनान्तर्जले
मग्नः तप्यमानः परं तपः निर्वृतिं मीनराजस्य दृष्ट्वा मैथुनधर्मिणः ३९ जातस्पृहो नृपं विप्रः कन्यामेकामया-
चत सोऽप्याह गृह्यतां ब्रह्मन् कामं कन्या स्वयंवरे ४० स विचिन्त्याप्रियं स्त्रीणां जरठोऽयमसन्मतः वलीपलि-
त एजत्क इत्यहं प्रत्युदाहृतः ४१ तथेत्यस्य प्रपेवृत्त। साधयिष्ये तथात्मानं सुरस्त्रीणामभीप्सितं किं पुनः म-
नुजेन्द्राणामिति व्यवसितः प्रभुः ४२ मुनिः प्रवेशितः क्षत्रा कन्यान्तःपुरमृद्धिमत् वृतस्स राजकन्याभिरे-
कः पंचाशता वरः ४३ तासां कलिरभूद्भूयांस्तदर्थेऽपोह्य सौहृदं ममानुरूपो नायं व इति तद्गतचेतसां ४४ स
बह्वृचस्ताभिरपारणीयतपःश्रियानर्घ्यपरिच्छदेषु गृहेषु नानोपवनामलांभःसरःसु सौगन्धिककाननेषु
४५

वत्सरूपाभिः तेषां स्वसारः मान्धातुः कन्याः ३८ ननु तापसस्य कुतो विवाहप्रसंगः कथं वा न राजर्षे राजकन्या वव्रिरे तत्राह
यमुनान्तर्जल इति षड्भिः एवं मान्धाता तं सौभरिं मान्धाता स्वयंवरे कामं गृह्यतामित्याह स विप्रः स्त्रीणामप्रियं मां विचिन्त्याने-
नाहं प्रत्युक्तो न त्वात्मानं तथा साधयिष्यामीति षड्भिः व्यवसितो निश्चितवानिति द्वयोरन्वयः अभिप्रायमेवाह तेन तापसम्पादिना
वास्त्रसंमतोऽहमिति कुतो वलीभिः युक्तः पलितानि तस्य एजत्कः कम्पमानशिराः जरठो वृद्धः ४१ तथेत्यस्य प्रपेवः सुरस्त्रीणामभीप्सितं किं पुनः मनुजेन्द्राणां योषित इति
यः तासामिति ४२ ततः किं वृत्तं तदाह मुनिरिति द्वाभ्यां क्षत्रा अन्तःपुराध्यक्षेण प्रवेशितो राजकन्याभिः सप्रकम्पमेव वरो वृतः ४३ ॥४४ ४॥ तस्य गार्हस्थ्यं वर्णयति
सगतिवर्णिभिः बह्वृच इति मन्त्रमात्रस्य मुक्ताभिः सह रेमे इत्युत्तरेणान्वयः कुतो मम पारणीयं यदुरन्तं तपः तस्य श्रिया समृद्ध्या अनर्घ्याः परिच्छदा येषु तेषु गृहेषु नाना

१०

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

कथंभूतेषु गृहादिषु स्वलंकृताः स्त्रियः पुरुषाश्च येषु अनुगायंतो द्विजाश्च पक्षिणः भृंगाश्च वंदिनश्च येषु कथंभूतः महार्हशय्यादि
भिरुपलक्षितः सन् ४६ स्तंभं गर्वं ४७ आज्यस्तोकैः स्तोकैर्बिंदुभिः ४८ इदानीं तस्यानुतापप्रकारं वक्तुं वानप्रस्थाश्रममाह स कदाचिदि
ति सप्तभिः आत्मनो मनसो हेतोः आत्मनोपह्नवं तपोहानिं ददर्श ४९ मत्स्यासंगसंबंधिनं ब्रह्म तपो हृतं तस्य ब्रह्मतपः ५० मिथुनव्रति
नां दंपत्यादीनां संगं त्यजेत् यदि च संगः तर्हि तद्व्रतेषु ईश्वरार्थधर्मपरेषु पुरुषेषु कार्य इति शेषः ५१ संगाज्जातं दोषं दर्शयन्नेव यतिपदक इति

महार्हशय्यासनवस्त्रभूषणस्नानानुलेपाभ्यवहारमाल्यकैः स्वलंकृतस्त्रीपुरुषेषु नित्यदा रेमेनुगायद्द्विज
भृंगवंदिषु ४५ यद्गार्हस्थ्यं तु संवीक्ष्य सप्तद्वीपवतीपतिः विस्मितः स्तंभमजहात्सार्वभौमश्रियान्वितं ४६ एवं गृ
हेष्वभिरतो विषयान्विविधैः सुखैः सेवमानो न चातुष्यदाज्यस्तोकैरिवानलः ४७ स कदाचिदुपासीन आत्माप
ह्नवमात्मनः ददर्श बह्वृचाचार्यो मीनसंगसमुत्थितं ४९ अहो इमं पश्यत मे विनाशं तपस्विनः सच्चरितव्रतस्य
अंतर्जले वारिचरप्रसंगात्प्रच्यावितं ब्रह्म चिरं धृतं यत् ५० संगं त्यजेत मिथुनव्रतिनां मुमुक्षुः सर्वात्मना न विसृजे
द्बहिरिंद्रियाणि एकश्चरन्रहसि चित्तमनंत ईशे युंजीत तद्व्रतिषु साधुषु चेत्प्रसंगः ५० एकस्तपस्व्यहमथा
भसि मत्स्यसंगात्पंचाशदासमुत पंचसहस्रसर्गः नांतं व्रजाम्युभयकृत्यमनोरथानां मायागुणैर्हृतमतिर्विष
यार्थभावः ५२ एवं वसन्गृहे कालं विरक्तो न्यासमास्थितः वनं जगामानुययुस्तत्पत्न्यः पतिदेवताः ५३ तत्र
तप्त्वा तपः तीक्ष्णमात्मकर्षणमात्मवान् सहैवाग्निभिरात्मानं युयोज परमात्मनि ५४ तास्स्वपत्युर्महाराज निः
रीक्ष्याध्यात्मिकीं गतिं अन्वीयुस्तत्प्रभावेन अग्निं शांतमिवार्चिषः ५५ इति भाग नव स्कं षष्ठो
यः ६ शुक उवाच मांधातृपुत्रप्रवरो योंबरीषः प्रकीर्तितः पितामहेन प्रवृतो यौवनाश्वस्तु तत्सुतः १।

पंचाशन्माभार्याभिः संबंधात् आसं बभूवमित्यर्थः ततश्च सतैः पंचसहस्रसर्गश्चासं प्रत्येकं तासु पुत्रशतस्योत्पत्तेः उभयकृ
त्यानि ऐहिकपारलौकिकानि गृहाणि तद्विषयाणां मनोरथानां अर्थभावः अर्थबुद्धिमान् ५२ न्यासोत्र संगत्याग एव वानप्रस्थाश्र
मं इत्यर्थः ५३ ५४ आध्यात्मिकीं गतिं ब्रह्मलीनत्वं ५५ इति भावा दीपि यान नव स्कं षष्ठो यः ६ मांधातृवं
शः प्रोक्तः सप्तमे यत्र गीयते अरुकुत्सस्य चाख्यानं वसिष्ठश्रयोर्मम पुत्रप्रवरः पुत्रश्रेष्ठः स पितामहेन युवनाश्वेन प्रवृ
तः पुत्रत्वेन स्वीकृतः अनपत्यत्वात् अस्मान्नाम्ना प्रवर्तितत्वात् तत्सुतः अंबरीषस्य सुतः १। १॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

श्रीः
भा॰न॰
टी॰
११

इमे यौवनाश्वा वरीषहारीताः मांधातृगोत्रस्य प्रवराः प्रवान्तरविशेषप्रवर्तकाः यद्वा यौवनाश्वविशेषणं पितामहेन मांधा
तामहस्यार्षेयवरणप्रदातुः मांधातात्रवरणेय यांइमे प्रवरीषायौवनाश्वहारीताः यथाश्वलायनः हरितकुत्सपिंग
दर्भभेमगवानामांगिरसांवरीषयौवनाश्वेति मांधातांवरीषेकेवृणते अतीत्यांगिरसं आंगिरसहारीतेति विकल्पयत्यर्थः मांधा
वरीषयौवनाश्वेतीति १ पुरुकुत्सस्य वंशकथाय पिप्पलादीनां वन्नर्मदां विवाहं प्रभावं वाह उरगेभ्योऽभयं दत्वा नर्मदान
या २ वध्यान्वधाहीन सत्पुरुकुत्सात्नागान्नब्रुवन् अन्ववमाह इदं नर्मदया रसातलनयनादिकं स्मरतो सर्पाद्भय
मिति ३ देहत्याति नान्तरसदस्यः सतोनरताल्यस्त्र्यः त्रयः शोकवद्द्वतः त्वहेतवो दोषाय स्यामे विशंकुः तद्वक्ते हरिवंशे

हारीतस्त्वस्य पुत्रोऽभून्मांधातृप्रवराइमे नर्मदाभ्रातृभिर्दत्ता पुरुकुत्साय योगिने तथा रसातलं नीतो भुजगें
द्रप्रयुक्तया २ गन्धर्वान्वधीत्सर्वान्नेविष्णुशक्तिभृत नागान्नब्रुवन् सर्पाद्भयं स्मरतामिदं त्रसद
स्युः पौरुकुत्सोयोनरण्यस्य देहकृत् हर्यश्वस्तत्सुतस्तस्मान्मारुणोऽथ निबन्धनः ४ तस्य सत्यव्रतः पुत्रः त्रि
शंकुरिति विश्रुतः प्राप्तश्चांडालतां शापाद्गुरोः कौशिकतेजसा ५ सशरीरोगतः स्वर्गमद्यापि दिवि दृश्यते
पातितोऽवाक्शिरा देवैस्तेनैव स्तंभितो बलात् ६ त्रैशंकवो हरिश्चन्द्रो विश्वामित्रवसिष्ठयोः यन्निमित्तम
भूद्युद्धं पक्षिणोर्बहुवार्षिकं ७ सोऽनपत्यो विषण्णात्मा नारदस्योपदेशतः वरुणं शरणं यातः पुत्रो मे जायतां
प्रभो ८ यदि वीरो महाराज तेनैव त्वां यजे इति तथेति वरुणेनास्य पुत्रो जातस्तु रोहितः ९ जातः सुतो ह्यनेन
नाग मां यजस्वेति सोऽब्रवीत् यदा पशुर्निर्दशः स्यादथ मेध्यो भवेदिति १० निर्दशे च स आगत्य यजस्वेत्याह
सोऽब्रवीत् यदा पशुर्निर्दशः स्याद् दन्ताः पशोर्यज्जायेरन् अथ मेध्यो भवेदिति ११ जाता दन्ता यजस्वेति स प्रत्या
हासौ ब्रवीत् यदा पतन्त्यस्य दन्ता अथ मेध्यो भवेदिति १२
पतितेऽपि यमानो विप्रकन्याहरणात् कु
पितस्त्वा पुरितो पेता गुरो दौर्योधीवयेनव प्रत्येषितोपयोगात् त्रिविधपस्त्वतिक्रमहति पक्षिणोः यमानो ... त्रिशंकुयोर्विश्वामित्र
हस्य गुरोः पितृशापात् कौशिकस्य विश्वामित्रस्य तेजसा प्रभावेण ५ तेनैव कौशिकेन ६ पक्षिणोः आडीबकयोर्विश्वामित्र
वसिष्ठयोः यन्निमित्तं ... विश्वामित्रस्य आडीभवेति शापा
दानस्य यद्दक्षिणाछलेन हरिश्चन्द्रसर्वस्वमपहृत्य पातयामास तत्कुद्धो कुपितो वसिष्ठोऽपि कुपितो विश्वामित्रं बकोभवेति शापा
दानस्य यदक्षिणाछलेन हरिश्चन्द्र सर्वस्वमपहृत्य पातयामास तत्कुद्धो ... इत्यादि ... हरिश्चन्द्रस्य
पत्नी ... बकोभवेति वसिष्ठशापाय यांगृहयुद्धमभूदिति प्रसिद्धम् ७ हरिश्चन्द्रो ... प्रजाः ... पुत्रो मे जायतेत तर्हि तेनैव पुरुषपशुना त्वां यजेय नामीति।
वरितमाह सोऽनपत्य इत्यादि यावदध्यायसमाप्तिः कथं शरणं यातः तदाह पुत्रो यया जायतां यदि वीरः पुत्रो मे जायतेत तर्हि तेनैव पुरुषपशुना त्वां यजेयं नामीति।

अथ यातेषु तेष्वेतानि नामानि प्रजाताः ७ ९ १० ११ १२

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

जातेपुत्रेमद्वरुणोजातःसतोमामनेनयजस्वेतिसप्रत्याहाथसोब्रवीत्तदापशुर्निर्दशःनिर्गतदशादिवसःस्यादित्यवसरजात्र
दित्यनुषंगः १३ राजन्नुहेवरुणायजन्नुयःपशुर्यदासांनाह्निकःकवचसंवन्धार्हःसंग्रामसमर्थःस्यात्तदाहस्तुचिः १४ इत्ये
वंतंतंकालेवंचयतारराजाउक्तःपार्थिवोदेवोवरुणःततंकालंपर्यैच्छत्तेनत्यर्थः १५ चिकीर्षितमात्मनापशुनावरुणायजने १६
ततस्त्वरूपितेनवरुणेनग्रस्तस्तनयवजातेनमहदुदरंयस्यतंपितरंस्मृत्वा १७ समोवर्षं १८ द्वितीयेचवर्षेहरिश्चंद्राथभ्येत्याभ्येत्यत
मेवतंमत्युमैथनकिंचकिंविदाह १९ २० वरुणेनमुक्तमुदरंयस्यमहत्त्वकथायस्यसः २१ आत्मवान्जमदग्निरध्वर्युरभवत्तत्र

पश्चान्निपतितेदंतायजस्वेत्याहसोब्रवीत् यदापशोःपुनर्दंताजायंतेथपशुःशुचिः १३ पुनर्जातायजस्वेतिस।
प्रत्याहाथसोब्रवीत् सान्नाह्निकोयदाराजन्राजन्योथपशुःशुचिः १४ इतिपुत्रानुरागेणस्नेहयंत्रितचेतसा
कालंवंचयतातंतमुक्तोदेवस्तमैक्षत १५ रोहितस्तदभिज्ञायपितुःकर्मचिकीर्षितं प्राणप्रेप्सुर्धनुष्पाणिररण्यं
प्रत्यपद्यत १६ पितरंवरुणग्रस्तंश्रुत्वाजातमहोदरम् रोहितोग्राममेयायतमिंद्रःप्रत्यषेधत १७ भूमेःपर्यटनंपु
ण्यंतीर्थक्षेत्रनिषेवणैः रोहितायादिशच्छक्रःसोप्यरण्येवसत्समाः १८ एवंद्वितीयेतृतीयेचतुर्थेपंचमेतथा
अभ्येत्याभ्येत्यस्थविरोविप्रोभूत्वाहवृत्रहा १९ षष्ठंसंवत्सरंतत्रचरित्वारोहितःपुरीं उपव्रजन्नजीगर्तादक्रीणान्म
ध्यमंसुतं २० शुनःशेपंपशुंपित्रेप्रदायसमवंदत ततःपुरुषमेधेनहरिश्चंद्रोमहायशाः २१ मुक्तोदरोयज
द्देवान्वरुणादीन्महत्कथाः विश्वामित्रोभवत्तस्मिन्होताचाध्वर्युरात्मवान् २२ जमदग्निरभूद्ब्रह्मावसिष्ठोयास्य
सामगः तस्मैतुष्टोददाविंद्रःशातकौंभमयंरथं २३ शुनःशेफस्यमाहात्म्यमुपरिष्टात्प्रचक्ष्यते सत्यंसारंधृतिं
दृष्ट्वासभार्यस्यचभूपतेः विश्वामित्रोभृशंप्रीतोददावविहतांगतिं मनःपृथिव्यांतामद्भिस्तेजसापोनिलेनतत्

सोमुनिःसामगउद्गाताब्रह्मभूदित्यर्थः २२ उपरिष्टात्विश्वामित्रस्यनाख्यानप्रसंगेन २३ अविहतांगतिंज्ञानं २४ तामेव
गतिमाह माहाभ्यांमनःपृथिव्यांधारयत्तांतनकलाध्यात्मतयातांनेविनिर्दहत्‌ लोहिताम्मुक्तोमुक्तबन्धनःतस्याविस्पव
यःमनोमूलोहिसंसारःमनःचान्नमयंअन्नमयंहिसोम्यमनइतिश्रुतेः अतोत्मशब्दवाच्यायांपृथिव्यांमनोधारयत्पकीऊर्वेव
अपस्तेजसातन्तेजोनिलेनतंवायेश्वाकाशेतच्चभूतादावहंकारेतंचमहदादिमहंकारंमहात्मनिमहत्तत्वे २५ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

श्री: भा॰ न॰ टी॰ २६

तस्मिन्विषयाकारं ध्यातव्यं तानकलां ज्ञानांशमात्मत्वेन ध्यानात्तया ध्यानहृतिरूपया प्रात्मावरकमज्ञानं विनिर्दहन्नुनिर्वाण
स्वरवसंविदातो बहिर्वासस्तन्तवन्धनः अनिर्देश्येनाप्रतर्क्येणस्वेन भावेन सम्यग्रूपेणातस्थौ २७ इति भावा नव स्कंधे सप्तमो
ध्यायः ७ अष्टमे रोहितस्यान्वये बाहुकोराजाभवद्भूपः सगरः कपिलात्तेपात्रिर्दग्धा यत्सुतः स्तनवः चम्पस्तस्माद्भूधेनचम्पापुरी
विनिर्मिता अतः चम्पात्सुदेवः १ हृताभूर्यस्य २ और्वेणात्मस्थितिज्ञात्मानं देहं प्रजावन्तं सगर्भ ३ गरोविषं तेन गरेणास्तहैव

विवाङ्गुष्ठधारयस्त चभूत्वादीतेभस्मात्मति

तस्मिन्नुत्तानकलाध्यावानयात्तानं विनिर्दहन् हित्वातोस्वेन भावेन निर्वाणस्वरवसंविदा गा अनिर्देश्यमप्रत
र्क्येण तथाविधस्तत्तवन्धन २७ इति भाग ९ तेनं मस्कं सप्त ध्यायः ७ शुक उवाच हरितो रोहितसुतः च
म्पः तस्माद्विनिर्मिता चंपापुरी सुदेवोतो विजयो यस्य चात्मजः १ भरुकः तत्सुतः तस्माद्वृकस्तस्यापि बाहुकः
सोरिभिर्हृतभूराजा सभार्यो वनमाविशत २ वृद्धं तं पञ्चतां प्राप्तं महिष्यनुमरिष्यती और्वेण जानतात्मानं प्रजावंतं
निवारिता ३ आज्ञायास्यै सपत्नीभिर्गरो दत्तोन्धसा सह सह तेनैव संजातः सगराख्यो महायशाः ४ सगरश्च
क्रवर्त्यासीत्सागरो यत्सुतैः कृतः यस्तालजंघान्यवनाञ्छकान्हैहयवर्बरान् ५ नावधीद्गुरुवाक्येन च
क्रे विकृतवेषिणः मुंडाञ्छ्मश्रुधरान्कांश्चिन्मुक्तकेशार्धमुंडितान् ६ अनंतर्वाससः कांश्चिदबहिर्वाससोपरा
न् सोश्वमेधैरयजत्सर्ववेदसुरात्मकं और्वोपदिष्टयोगेन हरिमात्मानमीश्वरं तस्योत्सृष्टं पशुं यज्ञे जहाराश्वं
पुरंदरः ८ सुमत्यास्तनया दृप्ताः पितुरादेशकारिणः हयमन्वेषमाणास्ते समंतान्न्यखनन्महीं ९ प्रागु
दीच्यां दिशि हयं ददृशुः कपिलांतिके एष वाजिहरश्चौर आस्ते मीलितलोचनः हन्यतां हन्यतां पाप इति षष्टि
सहस्रिणः उदायुधा अभिययुरुन्मिमेष तदा मुनिः ११ स्वशरीराग्निना तावन्महेंद्रहृतचेतसः महद्व्यतिक्रम
हता भस्मसादभवन्क्षणात् १२ ॥ १२

न्तो और्वेणाउपदिष्टो योगः उपायस्तेन तस्य हेमार्थे समन्ताः पुत्राणां प्रभावेन महेंद्रेवावृतः समत्याः इति षष्टिः एष वाजिहर इति ब्रुव
तोभियपुः षष्टिसहस्राणि पवित्रेदक तयासेति येषां उन्मिमेषलोचनो उन्मीलनं चकार १२ ॥ ॥
तः ४ ५ गुरुवाक्येन और्ववचनेन कांश्चिदर्हत्वैव विकृतवेषिणश्चकेन देवाहु मुंडानिति मुक्तकेशानर्धमुंडितांश्च
६ ७ ८ ९ १० ११

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

केचित्तु कपिलस्य कोपाग्निना दग्धा इति वर्णयंति तन्निराकरोति नेति विज्ञतरस्त्वेतदाह सत्वधामनि शुद्धसत्वमूर्तौ जगतः पवि
त्रः शुद्धिकरश्चासावात्मा च तस्मिन् कथं विभाव्यते संभाव्यते असंभावनायां दृष्टांतः भुवो रजः खे कथं संभाव्यत इति १३ किंच
येन यस्य ईरिता प्रवर्तिता तस्य विपश्चितः सर्वज्ञस्य कथं पृथक् मतिः अरिमित्रादिभेददृष्टिः १४ तदेवमसमत्याः पौत्रेषु
मृतेषु केशिन्याः पौत्रेणांशुः समानीतः पितृव्यो बरणाय यं स्तुतेत्यानिद र्शयितुमाह योसमंजस इत्युक्तः केवलमसौ
वसत्वतः समंजस एव राकेशिन्यास्ततः द्वेत्रजत्वमिव प्रतीतं वायतित स्यैव नृपस्यात्मजो देहाज्ञानतः १५ तस्य कथामाह तद
तुभिः समंजसः पूर्वजन्मनि १६ एवंविधः योगी सन् संगाद्विचालितः १६ अतइदानीं जातिस्मरः सन् संगपरिहारा

न साधुवादो मुनिकोपभर्जिता नृपेंद्रपुत्रा इति सत्वधामनि कथं तमो रोषमयं विभाव्यते जगत्पवित्रात्मनि
खे रजो भुवः १३ यस्येरिता सांख्यमयी दृढेह नौर्यया मुमुक्षुस्तरते दुरत्ययं भवार्णवं मृत्युपथं विपश्चितः
परात्मभूतस्य कथं पृथङ्मतिः १४ योसमंजस इत्युक्तः स केशिन्या नृपात्मजः तस्य पुत्रोंशुमान्नाम पिता
महहिते रतः १५ असमंजस आत्मानं दर्शयन्नसमंजसं जातिस्मरः पुरा संगाद्योगी योगाद्विचालितः
१६ आचरन्गर्हितं लोके ज्ञातीनां कर्म विप्रियं सरय्वां क्रीडतो बालान्प्रास्यदुद्वेजयन्जनं १७ एवंवृत्तः परित्य
क्तः पित्रा स्नेहमपोह्य वै योगैश्वर्येण बालांस्तान्दर्शयित्वा ततो ययौ १८ अयोध्यावासिनः सर्वे बालकान्पु
नरागतान् दृष्ट्वा विसिस्मिरे राजन्राजा चाप्यन्वतप्यत १९ अंशुमांश्चोदितो राज्ञा तुरगान्वेषणे ययौ पितृ
व्यखातानुपथं भस्मांति ददृशे हयं २० तत्रासीनं मुनिं वीक्ष्य कपिलाख्यमधोक्षजं अस्तौत्समाहितमनाः
प्रांजलिः प्रणतो महान् २१ अंशुमानुवाच न पश्यति त्वां परमात्मनो जनो न बुध्यतेद्यापि समाधियुक्तिभिः

सरय्वां जनमुद्वेजयन् लोके गर्हितं ज्ञातीनां च विप्रियं कर्माचरन् क्रीडतो बालान् सरय्वां प्रास्यत् प्राक्षिपदिति द्वयोरन्वयः
१७ एवंविधं वृत्तं कर्म यस्य सः १८ पितृव्यैः खातं तमनुपथं पश्चात् ते येषां भस्मानि तेषां भस्मसमीपे २० अजानतो वा जानतो वा
तु कस्माद्वर्ण्यते इति तत्राह षड्भिः ध्यानेनांशुमानेवमाह यः २१ अजनः अज्ञः ब्रह्मापि त्वां मनसापि न पश्यति न बुध्य
ते कथं भूतात्मनः तस्मात्परे के हेतुभिः समाधियुक्तिभिः समाधिनाप्यपरोक्षेण न पश्यति युक्तिभिः परोक्षमपि सम्य
ग्न बुध्यत इत्यर्थः अपरे अर्वाचीनाः तन्नुतन्नस्त्रापपरेषु अर्वाचीनतन्त्रे हेतुः तस्य ब्रह्मणः मनश्शरीरं च धीश्च सत्वतमोर
जः कार्याणि ताभिर्यथा विविधा देवतिर्यङ्नरादयः सर्गाः तेषु सृष्टाः तदपि वयं प्रकाशाः अज्ञाः कुतः प्रपश्यामेत्यर्थः २२

श्री: भा॰ न॰ टी॰ १३

अथवै किं पश्यति तत्राह ये देहभाजः ते स्वस्मिन्नवस्थितमपि त्वां न विदुः किं तु गुणानेव विपश्यन्ति उत वा सुप्तौ तम
एव पश्यन्ति यतः त्रिगुणप्रधानाः बुद्धिरेव प्रधानं येषां अतो बहिरेव प्रकाशो ज्ञानं येषां बुद्धिप्रवर्तनं तु न स्वाजात्यस्य सर्वथा विषयान्धा
पश्यन्ति सुप्तौ ज्ञानमप्रवर्तकं केवलं न तु निर्गुणत्वात् सर्वहेतुं त्वं यतः यस्य तव मायया निर्मोहितचेतसो येषां ते २३ तथापि वि
वादेशात्मस्मीति चेत्तत्राह तं त्वामहं विमूढः कथं परिभावयामि विचारयामि कथंभूतं ज्ञानघनं घनेन ज्ञानमूर्तिं स्वत एव
प्रध्वस्तो मायागुणनिमित्तो भेदमोहो येषां तैर्विभाव्यं विचिन्त्यं स्वयंभावः ज्ञानं च तन्न वा न तत्तावत् ज्ञानविषयतेविभागविषय
त्वेऽपि मायागुणैरभिभूतोऽहं न विचारसमर्थः इति २४ तस्मात् हे प्रशान्त त्वां पुराणं पुरुषं केवलं नमामेत्यन्वयः प्रशान्तागु॰
रूपत्वे हेतुः मायया गुणाः कर्माणि च विश्वसृष्ट्यादीनि लिङ्गानि च ब्रह्मादिरूपाणि यस्मात् प्रशान्तानि तेन सदसद्भ्यां कार्यका

ये देहभाजः त्रिगुणप्रधाना गुणान्विपश्यन्त्युत वा तमश्च यन्मायया मोहितचेतसस्त्वां विदुः स्वसंस्थं न बहिः
प्रकाशाः २३ तं त्वामहं ज्ञानघनं स्वभावप्रध्वस्तमायागुणभेदमोहैः सनन्दनाद्यैर्मुनिभिर्विभाव्यं कथं विमूढः
परिभावयामि २४ प्रशान्तमायागुणकर्मलिङ्गमनामरूपं सदसद्विमुक्तं ज्ञानोपदेशाय गृहीतदेहं नमाम
हे त्वां पुरुषं पुराणं २५ त्वन्मायारचिते लोके वस्तुबुद्ध्या गृहादिषु भ्रमन्ति कामलोभेर्ष्यामोहविभ्रान्तचेतसः
२६ अद्य नः सर्वभूतात्मन्कामकर्मेन्द्रियाशयः मोहपाशो दृढश्छिन्नो भगवंस्तव दर्शनात् २७ शुक उवाच
इत्थं गीतानुभावस्तं भगवान्कपिलो मुनिः अंशुमन्तमुवाचेदमनुगृह्य धिया नृप २८ भगवानुवाच अ
श्वोऽयं नीयतां वत्स पितामहपशुस्तव इमे च पितरो दग्धा गङ्गाम्भोऽर्हन्ति नेतरत् २९ तं परिक्रम्य शिरसा प्रसा
द्य हयमानयत् सगरस्तेन पशुना क्रतुशेषं समापयत् ३० राज्यमंशुमति न्यस्य निःस्पृहो मुक्तबन्धनः और्वो
पदिष्टमार्गेण लेभे गतिमनुत्तमाम् ३१ इति ग ने सागरोपाख्याने ऽष्टमोऽध्यायः ८

रणाभ्यां गुणप्रधानाभ्यां वा विमुक्तं अतः अनामरूपं तल्लक्षणेन नामरूपं नास्य किं तु ज्ञानोपदेशाय गृहीतः प्रकटितो देहः सुहृस
म्मूर्तिर्येन तं यद्वा हे प्रशान्तमायेति हे प्रगुणानि च संबोध्य कर्माणि सृष्ट्यादिकार्यलिङ्गानि यस्येति या ज्ञेयं यद्वा प्रशान्ते माया
गुणादयो यस्मिन् इत्येकमेव पदं २५ स्वभावं पश्चात्तापयति त्वन्मायेति द्वाभ्यां कामादिभिर्विभ्रान्तानि चेतांसि येषां ते इमे सर्वे गृहा
दिषु भ्रमन्ति २६ हे सर्वभूतात्मन् नः अस्माकं तव कृपैव यत इदानीं त्वद्दर्शनादतिदृढोऽपि मोहमयः पाशः छिन्नः कथंभू
तः कामादीनामाशयः आश्रयः त्वत्प्रसादेन कृतार्थोऽस्मीत्यर्थः २७ २८ अश्वं लब्ध्वापि साकाङ्क्षं मन्यमानमाह इमे चेति २९
परिक्रम्येति स्पष्टोक्तिः ३० इति भावा दीपिका नवमे ऽष्टमोऽध्यायः ८

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

नवमे प्रसतो वंशः स्वर्ड्गगावधिवर्ण्यते गंगांभूतलमानिन्ये यस्यपौत्रो भगीरथः यद्यसागरः पौत्रायरात्स्वंदत्वातपसे
पेतस्वांशुमांश्चस्वपुत्रायराज्यं दत्त्वामहांतं कालं तपस्तेप इतिवकारस्यार्थः नाशक्रोद्गंगामानेतुमितिशेषः संस्थितः
मृतः १ कालमृत्युपयदानूपाम्नः तेपस्यात्मानं दर्शयामास तेवरदास्मीति गंगयोक्तः सन् स्वमभिप्रायं प्रवेनोद्वरणोश्मो
मक्तयामास ३ आह गंगा कोपि गगनान्पतंत्यामे वेगन्धारयिता धारयिष्यति ४ किंवस्पा भूमेतिवलंयिष्यतित
योपायोविचिन्त्यतां ५ हरंतिहरिष्यति अधचभिनतीत्यचभित ६ आत्माकश्चभूतः यस्मिन्निदं विश्वमोतं ग्रथितं ऊर्धतन
कालं महांतं तेनाशक्नोन्नतःकालेन संस्थितः १ दिली
शुक उवाच अंशुमांश्चतपस्तेपे गंगानयनकाम्यया
पस्तन्नतस्य दशाकेः कालमेयिवान् भगीरथस्तस्य पुत्रः तेपे स सुमहत्तपः २ दर्शयामासतंदेवी प्रसन्नावर
दास्मिते इत्युक्तः स्वमभिप्रायं शंसावानतोन्नपः ३ कोपिधारयिता वेगं पतंत्यामे महीतले अन्यथा भूत
लंभित्वा नूपयास्ये रसातलं ४ किंवाहं न भवं यास्ये नूरामामामृजन्त्यघं मृजामितदद्यं कुत्र राजंस्तत्रविचिंत्य
तां ५ भगीरथ उवाच साधवोन्यासिनः शांताब्रह्मिष्ठा लोकपावनाः हरंत्यघं तेंगसंगात्तेषास्तेह्यघभिद्धरिः
६ धारयिष्यति ते वेगं रुद्रस्त्वात्माशरीरिणां यस्मिन्नोतमिदं प्रोतं यस्मिन् शाटीनतंतुषु ७ इत्युक्त्वा स नृपो
देवं तपसातोषयाच्छिवं कालेनाल्पीयसा राजंस्तस्येशः समतुष्यत ८ तथेति राज्ञाभिहितं सर्वलोकहितः
शिवः दधारावहितो गंगां पादपूतजलां हरेः ९ भगीरथः स राजर्षिनिन्ये भुवनपावनीं यत्र स्वपितृणां दे
हा भस्मीभूताः स्मशेरते १० रथेन वायुवेगेन प्रयांतमनुधावती देशान्पुनंती निर्दग्धानासिंचत्सगरात्मजा
न् ११ यज्जलस्पर्शमात्रेण ब्रह्मदंडहता अपि सगरात्मजा दिवं जग्मुः केवलं देहभस्मभिः १२ भस्मीभूता
ङ्गसंगेन स्वर्याताः सगरात्मजाः किंपुनः श्रद्धया देवीं ये सेवंते धृतव्रताः १३ न ह्येतत्परमाश्चर्यं स्वर्धुन्या यदि
श्चत्वाठीवपरा इव प्रोते च तिर्यक्तंतुषु पटइव अत्रोसर्वाधारस्त्वद्वेगं धारयिष्यतीत्यर्थः एवं गंगामनुज्ञाप्य तपश्चेति
पादेश्चावधिनेत्यर्थः ८ राज्ञाभिहितेन तथेत्यंगीकृत्य हरेः पादेन पूतं जलं यस्याः तां ९ १० ११ अस्संगाङ्गगामाहा
त्म्यमाह यज्जलेति यस्या जलस्पर्शमात्रेण नत्वकेवलं देहभस्मभिरेव न साक्षात् ब्रह्मर्षिस्वकृतेन दंडेन हताअपि तो
श्रद्धयाभिसेवेतीति शेषः १२ तन्माघवयतिभस्मीभूतेनांगेन यः संगः तेन १३ १४ अनंतस्यापि विशेषणमाह निवेश्यतिवे

श्री: भा· न· टी· २४

१६ नलस्य सखा वाश्वयानतत्त्वप्राप्तः तस्मात्ततः ऋतुपर्णाख्यस्ततः १७ तत्पुत्रः सौदासः यं मित्रसहं कल्माषपादं चाहुस्तत्र का
रणमाह वसिष्ठशापादिति १९ मृगयां चरन् किञ्चिद्रक्षो जघान तस्य भ्रातरं मुमोच स भ्राता नापलाय्य गतः प्रच्छ
न्नः सूदः पाचकः तद्रूपधरः सन् राज्ञो गृहे वर्तमानः २१ अभक्ष्यमञ्जसा विलोक्य एवं त्वं रक्षो भव इत्याह वसिष्ठ

मे निवेश्य मनो यस्मिन् श्रद्धया मुनयोऽमलाः त्रैगुण्यं दुस्त्यजं हित्वा सद्यो यातास्तदात्मतां १५ श्रुतो भगी
रथाज्जज्ञे तस्य नाभोऽपरोऽभवत् सिन्धुद्वीपस्ततस्तस्मादयुतायुस्ततोऽभवत् १६ ऋतुपर्णो नलसखो योऽश्ववि
द्यामयान्नलात् दत्त्वाक्षहृदयं चास्मै सर्वकामस्तु तत्सुतः १७ ततः सुदासस्तत्पुत्रो दमयन्तीपतिर्नृप आ
हुर्मित्रसहं यं वै कल्माषाङ्घ्रिमुत क्वचित् वसिष्ठशापाद्रक्षोऽभूदनपत्यः स्वकर्मणा १८ राजोवाच किंनि
मित्तो गुरोः शापः सौदासस्य महात्मनः एतद्वेदितुमिच्छामः कथ्यतां न रहो यदि १९ शुक उवाच सौदासो
मृगयां किञ्चिच्चरन् रक्षो जघान ह मुमोच भ्रातरं सोऽथ गतः प्रतिचिकीर्षया २० स चिन्तयन्नघं राज्ञः सू
दरूपधरो गृहे गुरवे भोक्तुकामाय पक्त्वा निन्ये नरामिषम् २१ परिवेक्ष्यमाणं भगवान् विलोक्याभक्ष्यम
ञ्जसा राजानमशपत् क्रुद्धो रक्षो ह्येवं भविष्यसि २२ रक्षःकृतं तद्विदित्वा चक्रे द्वादशवार्षिकं सोऽप्यपोऽञ्ज
लिमादाय गुरुं शप्तुं समुद्यतः वारितो मदयन्त्यापो रुशतीः पादयोर्जहौ २३ दिशः खमवनीं सर्वं पश्यन्
जीवमयं नृपः राक्षसं भावमापन्नः पादे कल्माषतां गतः २४ व्यवायकाले ददृशे वनौकोदम्पती द्विजौ क्षु
धार्तो जगृहे विप्रं तत्पत्न्याहाकृतार्थवत् २५ न भवान् राक्षसः साक्षादिक्ष्वाकूणां महारथः मदयन्त्याः
पतिर्वीर नाधर्मं कर्तुमर्हसि २६ देहि मेऽपत्यकामाया अकृतार्थं पतिं द्विजं देहोऽयं मानुषो राजन् पुरुष
स्याखिलार्थदः २७ तस्मादस्य वधो वीर सर्वार्थवध उच्यते एष हि ब्राह्मणो विद्वांस्तपःशीलगुणान्वितः

एवं तेन शापं द्वादशवार्षिकं चक्रे २२ रुशतीः तीक्ष्णा अपः स्वपादयोर्जहौ नान्यत्र २३ तत्र हेतुः दिशः इति एवमनेनामि
त्रसहत्वमपि दर्शितं मित्रस्य कलत्रस्य वाचः सहनात् २४ तद्देव राक्षसत्वे कल्माषाङ्घ्रित्वे च कारणमुक्त्वा स्वकर्मणा
नपत्य इति यदुक्तं तत्प्रपञ्चयति व्यवायकाल इत्यादि कर्मणा अप्रजस्त्वं तेन वनमोकं निवासो ययोः तौ वनौकसौ
तौ च दम्पती च वनौकोदम्पती सकारलोपश्चार्षः अकृतार्थवत् दीनवत् अकृतार्थं असमाप्तरतिं २८

२४

सर्वभूतानामात्मेति भावनया याराध्य यत्नं मिश्रुः यद्वा सर्वभूतानामात्मभावेन भूतेषु येन मयि गुणेरंतर्हितं ब्रह्मेति संवल्यः
पाठांतरे श्रेतर्हितः सोयमित्युत्तरेणान्वयः २५ ३० भ्रूणास्य श्रोत्रियस्य गर्भस्य मतः इति वा वशोः सोमतो मतो भवानूवधं कथं
साधु मन्यत इत्यर्थः ३१ तत्राणमपि येन विना न जीविष्यामि सोयं यदि भक्षः क्रियते तर्हि मृतकं यथा मृतभार्यो मांसं भक्ष्यतय
३२ द्वितियं गर्भाधानकर्तारं ३४ आधानान्मैथुनात् हे स्वकृत मत्तमृत्युमर्यादा दृशितः ३५ ३६ तदेवं कर्मणा प्रसः ३८ अपि

आदितायतिपुत्रं ब्रह्म महापुरुष संज्ञितं सर्वभूतात्मभावेन भूतेष्वंतर्हितं गुणैः २९ सोयं ब्रह्मर्षिवर्यस्ते राजर्षिप्रवरा
अरिवायतिपुत्रं ब्रह्म महापुरुषसंज्ञितं ... तस्य मामायाप पापस्य भ्रूणस्य ब्रह्मवादिनः कथं वधं यथा वशोर्म
हिषी कथमर्हति यं मंत्र वधं पितृविवात्मजः ३० तस्य मामाधार पापस्य भ्रूणस्य ब्रह्मवादिनः कथं वधं यथा वशोर्म
ह्योतं संमतं भवान् ३१ यद्ययं क्रियते भक्षः तर्हि मां खाद पूर्वतः मनोविष्ये विना येन स्तनं मृतकं यथा ३२ एवं क
रुणाभाषिण्या विलपंत्या अनाथवत् व्याघ्रः पशुमिवाखादत्सौदासः शापमोहितः ३३ ब्राह्मणीवीक्ष्य दिधिषुं
पुरुषादेन भक्षितं शोचंत्यात्मानमुर्वीशमशपत्कुपिता सती ३४ यस्मान्मे भक्षितः पाप कामार्तायाः पतिस्त्वया
तवापि मृत्युराधानादकृतप्रज्ञ दर्शितः ३५ एवं मित्रसहं शप्त्वा पतिलोकपरायणा तदस्थीनि समिद्धेग्नौ प्रास्य भर्तु
र्गतिं गता ३६ विशापो द्वादशाब्दांते मैथुनाय समुद्यतः विज्ञाप्य ब्राह्मणीशापं महिष्या स निवारितः ३७ तत ऊर्ध्वं
स तत्याज स्त्रीसुखं कर्मणाप्रजः वसिष्ठस्तदनुज्ञातो मदयंत्यां प्रजामधात् ३८ सा वै सप्त समा गर्भमबिभ्रन्न व्यजा
यत जघ्नेश्मनोदरं तस्याः सोश्मकस्तेन कथ्यते ३९ अश्मकान्मूलको जज्ञे यः स्त्रीभिः परिरक्षितः नारीकवच
इत्युक्तो निःक्षत्रे मूलकोभवत् ४० ततो दशरथस्तस्मात्पुत्र ऐडविडस्ततः राजा विश्वसहो यस्य खट्वांगश्चक्रवर्त्यभूत
४१ यो देवैरर्थितो दैत्यानवधीद्युधि दुर्जयः मुहूर्तमायुर्ज्ञात्वैत्य स्वपुरं संदधे मनः ४२ ॥ न मे ब्रह्मकुलात्प्रा
णाः कुलदैवान्न चात्मजाः न श्रियो न मही राज्यं न दाराश्चातिवल्लभाः ४३ ॥ ४३ ॥

प्रदद्यादित्यर्थः तन्नामायननामात ... अतो वसिष्ठ एव ... तस्या उदरमश्मना जघान स उत्पन्नः स तोश्मकः ३९ स्त्रीभिः संवेष्ट्य
परशुरामात्परिरक्षितः अतो नारीकवच इत्युक्तः निःक्षत्रे सति तद्वंशस्य मूलमभवत् अतो मूलक इति चोक्तः ४० यस्त्वैर्देवै
र्देवैरर्थितो ... खट्वांगो नाम प्रथमं तावन्ममायुः कथ्यतामिति देवैः चोक्ते मुहूर्तमात्रमिति तच्छ्रुत्वा देवदत्तेन विमानेन स्व
पुरं गत्वा ... स्मरणमेव केनकृतेन तन्निश्चयं ... ततिनेति संमाभिः कुलदैवाद्ध
पुरं संदधे मनः परमेश्वरे संदधे ४२ एतदेव स साधु ... स्मरणं पर्वकेनन्कृतेन निश्चय ...

लऊल्लान्सकाशान्मेषाण्णदयोनातिवल्लभाः नातिप्रियाः ४३

श्री: भा॰न॰ टी॰ ९५

मह्यंमम ४४ भूतभावनोहरिः तस्मिन्नेवभावनायस्मात्सोहंतंकामंनष्टोग्गा ४५ तत्रहेतुः यद्इतिविद्धिमांनीन्द्रियाणिधीश्च
येषांतेदेवाअपि ४६ अथतस्मात्प्रकृत्यात्मभावेनात्मनिब्रह्मंशगोगुसंगंविमुक्तंतेभावेनहित्वाततमेवाहंप्रपद्ये अत्मभाव
देहाद्यभिमानत्रयमज्ञानेनहित्वा ४८ सभावमेवाहयतदितिमनसाकल्पितंतदाणाद्यविषयत्वात्वासुदेवइतियंगृणा
ति अभ्यागायवभक्तान्ग्रहार्थमाविष्कृततनोर्वासुदेवत्वात् ४९ इति भावा दीपि यांन मस्कं नव ध्याय: ५

नवाल्पेपिमतिर्मह्यमथर्मेरमतेक्वचित् नापश्यत्मतमश्लोकाद्न्यत्किंचनवस्त्वहं ४४ देवकामवरोदत्तोमह्।
यत्रिभुवनेश्वरैः नष्टोगातमहंकामभूतभावनभावनः ४५ येविद्धिमेंद्रियाधियोदेवास्तेस्वहृदिस्थितं नवि
दंतिप्रियंमस्वदात्मानंकिमुतापरे ४६ अथेशमायाविरचितेषुसंगंगुणेषुगंधर्वपुरोपमेषु रूढंप्रकृत्यात्मनि
विश्वकर्तुर्भावेनहित्वातमहंप्रपद्ये ४७ इतिव्यवसितोबुद्ध्यानारायणगृहीतया हित्वान्यभावमज्ञानंततः स्व
भावमास्थितः ४८ यत्तद्ब्रह्मपरंसत्त्वमव्यंग्यमन्यकल्पितं भगवान्वासुदेवेतियंगृणंतिहिसात्वताः ४९
इति भाग तेन मस्कं नव ध्याय: ५ खट्वांगाद्दीर्घबाहुश्चरघुस्तस्मात्पृथुश्रवाः अजस्ततोमहाराज
तस्माद्दशरथोभवत् १ तस्यापिभगवानेषसाक्षाद्ब्रह्ममयोहरिः अंशांशेनचतुर्धागात्पुत्रत्वंप्रार्थितः सुरैः २
रामलक्ष्मणभरतशत्रुघ्नाइतिसंज्ञया तस्यानुचरितंराजन्नृषिभिःतत्वदर्शिभिः ३ श्रुतंहिवर्णितंभूरित्वया
सीतापतेर्मुहुः ३ गुर्वर्थेत्यक्तराज्योव्यचरदनुवनंपद्मपद्भ्यांप्रियायाः पाणिस्पर्शाक्षमाभ्यांमृजितपथरुजो
योहरींद्रानुजाभ्यां वैरूप्याच्छूर्पणख्याःप्रियविरहरुषारोपितभ्रूविजृंभ त्रस्ताब्धिर्बद्धसेतुःखलदवदहनः
कोसलेंद्रोवतान्नः ४ ॥

दशमेमहावृत्तेतेगावंशेश्रीरामसंभवं ताद्धरिचंवशेकेपाकृतायोध्यागमावधि खट्वांगाच्चदीर्घबाहुः १ ऋषिभिर्वाल्मीकप्र
भृतिभिर्वर्णितंत्वयाभ्रूजः श्रुतंतथापिसंक्षेपतः कथ्यमानंशृणु ३ अस्यकादिभिरकीर्णमद्भुतंरामविक्रमं अथ्यावहयतीव
त्वत्रैकश्लोकेसमस्यति सकोसलेंद्रःश्रीरामःनोस्मान्यातवतात् कथंभूतः योगुर्वर्थेपितुःसत्यस्यपालनार्थंत्यक्तराज्यः
सनअनुवनंवदतिस्मकुमाराभ्यांमञ्जनदेवाह प्रियायाः पाणिस्पर्शेनापिक्षमाभ्यांतनिवनमचरत् हरींद्रोहनुमा
नस्यग्रीवोवा अनुजोलक्ष्मणस्ताभ्यांमृजितापथिनीतापथरुजोमार्गश्रमोयस्यससर्पणखाव्रैरूप्याकेणनासिकाछेदहेतोः तयामलोभितेनरावणेनापहृतायाः प्रियायाः विरहरुषा विर
हः तेनारोपितयोर्भ्रुवोर्विजृंभेनत्रस्तोहिसमुद्रोयस्मात्ततैनः नदितायनेनबद्धः सेतुर्येनततःखलोरावणादयस्तएवदवावनंतस्यदहनः ४ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

संक्षेपतो वर्णितं रामचरितं आदितः आरभ्य विस्तरेणाह विश्वामित्राध्वर इत्यादिना यावत् प्रथमं पतनमवलक्ष्मणस्य तमभ्यनयेद्येवहनाऊ
त्सर्गः यत्र हृतानाम कोसलेन्द्रः स्ववनाविन्येनेनगान्तयः ५ लोकेषु वीराः तेषां समितौ समाजे पश्चैरेयं बकेथ नृविदा यष्टिमिवली
लयैव दाय सज्जीकृतमभोपितं विकृष्य मध्ये बभञ्ज हेतुं पड्ग्रेकठिनेग विष्टं तदा हरवारुकानाविभिः शातैरू मनीतं बालगजस्य ली
लेव लीलाय समः ६ अनुरूपाणां स्वयोग्यानां गुणाशीलादीनि यस्याः तां सीतां नाम्नां भवेद्दु रसिद्धिलिप्सोमनो युवानां श्रियं निर्वै
धनुर्भंगमहानादश्रवणात्स्वभिन्नसभृगुपतेर्दर्पं व्यनयत् अपनीतवान् कथं भूतस्य चिरमनकुवः राजबीजस्य न्यामहीयोकरोत्तस्य

विश्वामित्राध्वरे येन मारीचाद्या निशाचराः प्रथमतो लक्ष्मणस्यैव हतानैव्हृतपुङ्गवाः ५ यो लोकवीरसमितौ
नुरेशामग्रे सीतास्वयंवरगृहे त्रिपुरान्तोपनीतं आदाय बालगजलीलइवेक्षुयष्टिसज्जीकृतं नृपविकृष्य बभञ्ज मा
ध्ये ६ जित्वानुरूपगुणशीलनयोगरूपां सीताभिधां श्रियमुरस्यभिलब्धमानाम् मार्गे व्रजन्भृगुपतेर्व्यनयत्प्ररूढं
दर्पं महीमकृत यश्चिरराजबीजं ७ यः सत्यपाशपरिवीतपितुर्निदेशं मौलेणासचापिशिरसा जगृहे सभार्यः राज्यं श्रि
यं प्रणयिनः सुहृदो निवासं त्यक्त्वा ययौ वनमसङ्गनिवषक्तसंगः ८ वक्षःस्थलस्थ्यकृतरूपमभुदन्दुदेःनस्याखवरि
शिरहषणप्रमुख्यबन्धून् जघ्ने चतुर्दशसहस्रमपारणीयकोदण्डपाणिरटमानउवासहृद्धे ९ सीताकयाश्रवणा
दीपितहव्ययेन स्पृष्टं विलोक्य नृपतिन्प्राकन्ध्रेण जघ्नेद्रुतं प्लवमुखाश्रमतोपकृष्टो मारीचमाशु विशिखेन र
यथाकमुश्चः १० रक्षोधमेन वृकवद्धिपिनेसमक्ते वैदेहराजदुहितर्यपयापितायां आगावनेकृपणावत्प्रियया
वियुक्तः स्त्रीसंगिनां गतिमिति प्रथयेश्चचार ११ ॥
२ इदानेशुर्वर्धयेइति श्लोकं विवृणावआह. यइति कदाचित्कैकेय्या स्त्रैणेन राजा नन्दयेत्तिनेदास्यामीति प्रतिश्रुतेन तस्त्रीराममस्य यु
वराज्याभिषेकसमये तयाभर्तस्य राज्यं रामस्य च वने वासः प्रार्थितः तदा सत्यपाशेन परिवीतस्य पितुर्निदेशमाज्ञां शिरसा जगृ
हे ततो राज्यादिकं त्यक्त्वा सभार्यो वनं ययौ इत्यन्वयः तस्यापि सहवासत्यागे हेतुः मुक्तसंगो योगी आत्मन्यात्मानिवेति ८ वक्षःस्थले
शवणस्य स्वसुः शूर्पणखायाः अमुरुद्रुदे सीतां निरूपितोः कामातुरायाः इतिवार्तं येन्यकृतविकारमनयत् तस्याः खरत्रिशिर
दूषणप्रमुख्यान्बन्धून् चतुर्दशसहस्रान्जघान अनन्तरं प्रविशन् अपारणीयमसह्यं कोदण्डं पाणौ यस्य सः ९ सीतायाः कथाश्र
वणेन दीपितहृच्छयायस्यतेन सीताहरदिष्यता रावणस्य मारीचेन तत्सखः आश्रमात् दूरंप्रकर्षणाय स्वर्णमृगमारीचं विलोक्य जगाम नव
धुतेप्रकुम्नेनागवमुखाश्रमादेहलोयलादितेश्रन एव मलोभनेनाश्रमतः अनीपकृष्टः सन्वृकैरत्सयथाशरः इयः ११

श्रीः
भा॰ च॰
टी॰
२६

ततस्तु रक्तोऽथ मेघनादवधानन्तरम् मन्त्रिमण्डलीतायां प्रियया वियुक्तो भ्राता लक्ष्मणेन कृपणावहेन च द्वारं किं समभिश्रयः सन्नुत्थ
नेन प्रकारेणास्त्री संगिता दुःखोदर्को गतिम् आप्य यत्नमात्मार्थेन कृत्येन तकर्मणा रावणेन सह युद्धेन हतेन हत्यपशास्त्रीयदह
नादिकं यस्य तेन दायुधेषु रवत्तदग्धाकवन्धस्य हननाय प्रसादितुं वाक्षरात् समसहनं अथ वालिनि हते तेन कपिभिः दयिता
यां गतितुष्ट्वा अञ्जनभवाभ्यां च विनावद्भ्रीयस्य समवृजो वेलासमुद्रतीरमगात् १२ तत्र त्रिरात्रमुपवासेन प्रतीक्षितोऽपि सिन्धु

दग्धात्मकृत्यहतकृत्यमहाकबन्धेसख्योविधायकपिभिर्दयितागतिंतैः वुद्ध्वाथवालिनिहतेत्रवगेन्द्रसैन्यैर्वे
लामगात्समनुजोजभवार्चितांघ्रिः १२ पृष्ठोपविभ्रमविहन्नकराहतपातसंभ्रान्तनक्रमकरोभयगीर्णघोषः
सिन्धुःशिरस्सुहर्णापरिगृह्यरूपीपादारविन्दमुपगम्यवभाषएतत् १३ नन्वावयंजडधियोन्वविदामभूमन्कूटः
स्थमादिपुरुषंजगतामधीशं यत्वाद्भवतःसगणाणवजनःप्रजेशामन्याश्चभूतपतयःसभवान्नृसंशः १४
कामंपियाहिजहिविश्रवसोवमेहंत्रैलोक्यरावणमवाप्नुहिवीरपत्नीं वध्नीहिसेतुमिहतेयशसोवितत्यैगायं
तिदिग्विजयिनोयमुपेत्यभूपाः १५ वध्वोदधौरघुपतिर्विविधाद्रिकूटैःसेतुंकपीन्द्रकरकम्पितभूरुहांगैः सुग्रीव
नीलहनुमत्प्रमुखैरनीकैर्लङ्कांविभीषणदृशाविशदग्रदग्धां १६ सावाननेन्द्रवलरुद्धविहारकोष्ठश्रीहार
गोपुरसदोवलभीविटङ्का निर्भज्यमानधिषणाधनहेमकुम्भशृङ्गाटकागनकुलेवहदिनीवचाग्रा १७ रक्षस्य
तिनदवलोक्यनिजंभकुम्भप्राणादिमुख्यसनसंनतनर्दनकालेन पुत्रेणहस्तमतिकायविकम्पनादीन्सर्वाननुगान्स
महिनादयचकुम्भकर्णं १८ तांयातुधानपृतनामसिशूलचापप्रासष्टिशक्तितोमरवाणकूटैर्वा सुग्रीवलक्ष्म

पदातोपस्थितस्तदायस्य रोषविशेषणाकोपलीलया विहन्तोऽयः कृतः ततः तस्य पातेन संभ्रान्ता नक्रा मकरा यस्मिन् भयेन गीर्णा ग्रस्ताः
लाभिता घोषाः येन सः सिन्धुः रुहस्त्यमानाणवभाषेत यरहिणामवीदिकं रूपी मूर्तिमान् १३ भाषणमेवाह नन्वाविति हे अम्भोरुहनाभ ए तावत् यन्
त्वाविद्भ्यां तेन सह सिन्धुः रहस्त्यमानावभाष्य एतत् अरणामवादिकं रूपी मूर्तिमान् १३ भाषणमेवाह नन्वावयमिति हे भूमन् वयं जडधियः त्वां कूटस्थं न विदाम यतः त्वत्तः सगणाः ब्रह्मादयः
जडा इति नन्वा नविदाम जगतामीशं अन्ये पशुपतयः यदि निश्चयकार्ये पशुपतयः प्रजापतयः सर्वादिभ्यः सहमाणा
त्वं निश्चित्ता नविद्यानन्नानीशं इत्यर्थः इदानीं मनुष्याणामीशं त्वामविदित्वा यदि निश्चयकार्ये पृष्ठतः अभवन् तेषां त्वमादिः इत्यर्थः सर्वादिभ्यः सर्वमाणा
हृदयो भवांस्त्वं सभवानिति १४ कामंयथेष्टं लङ्कां याहि प्रियां प्राप्नुहि एवमेव हे प्रभो विश्रवसो यमेहं त्रैलोक्यरावणं तथा तं जहि हे वीर पत्नीं त्वं वध्नीहि सेतुम्
वाक्येन तस्य यमिह सेतुं वध्नीहि इति तस्य किमर्थं यशसां विस्ताराय तदेवाह ये मनुष्याः तत्र ते कृत्यं वीर्यं यशो गायन्ति विजयिनो गायन्तीति ते तं सामीप्यं भविष्यतीति १५ तदा कामम्
ततस्तत्र संग्रामानन्तरं वध्नीहि इति किमर्थं ते यशसां विस्ताराय दिग्विजयिनः यशसां गायन्ति निश्चयात् कपीन्द्राणां करे कम्पिता भूरुहा नाम अङ्गानि शृङ्गाणि
भित्त्वा उपलक्षितः तदाह वध्वोदधौ विविधैर्विविधाद्रिकूटैः कपीन्द्रकरकम्पितभूरुहाङ्गैः सेतुं वद्ध्वा सुग्रीवनीलहनुमत्प्रमुखैरनीकैः विभीषणदृशा लङ्कां वेष्टितवानित्यर्थः
दाह विशदं यथा स्यात्तथा दग्धां सुग्रीवादयः प्रमुखाः येषां तैरनीकैः १६ ततः सा लङ्का चूर्णी प्रचलिता वभूव कथंभूता वानरेन्द्राणां बलेन रुद्धा विहाराः
वाटीनि येषु तेः विभीषणायस्य दशाननस्य अङ्काः सहावि प्रासादाः गोपुराणि सदः सभा वलभी प्रासादाग्रभागाः छादिनी विटङ्काः
दवाक्षयस्मा निर्भज्यमाना धिषणा द्रव्याणि यस्यास्तया विहाराः क्रीडास्थानानि कोष्ठा धान्यागाराः श्रीहार अट्टहारादीनि गोपुराणि पुरद्वाराणि सदः सभा वलभी प्रासादादिषु द्वारमार्गाः छादिनी विटङ्काः
नगरपालिकाधिषणा वादिकादिरक्षकाः तत्र यस्याः १७ रक्षस्पती रावणः पुत्रं मित्रं जितं प्रहस्तादीश्च समाहतान् १८ प्रासं कुन्तादि भिन्दिपालं नालं पालयानात् नारायणस्तेनासीत्

तेन स्तुपते सनीकयास्त्रंगदाद्याः सर्वैर्वानरास्त्र आदिभिर्यद्दृद्वं येसैन्ये तन्न द्वंद्वं यथा भवति तथाभियुद्ध संगमत्युद्रमादीभर्जंतुः का
मन्मीताया अभिमर्षेन हतेन गले यस्य सरावणाः ईशो येषां नाथ १९ सबलस्य नष्टिं वा शमवेत्य रुष्टः क्रुद्धः सनृयान कंकुचा
केविमाने रथे वा आरुह्य श्रीराममभिससार अथो तेन स्यन्दनेन स्वर्गस्थ इन्द्रस्य रथ्यमान लिना इन्द्रसारथिनोपनीते द्युम
तिदीप्तिपुञ्जे विभ्राजमानम हनतमहन् ३१ हे पुरुषाद पुरीषभाषयस्मात्सदमहतापुत्रवत् स्वाय यास्त्रसमस्तगृहे
प्रविश्य किमपि हरति तद्वत् स्माज्जुगुप्सितस्य कर्मणः कर्तुस्ते अद्य कालइवालंघ्यवीर्योहं फलं यच्छामि अथमेक

तेनीकपा वस्तुपते रभिपत्य सर्वैर्द्वंद्वं वरूथमिभपत्ति रथाश्वयोधैः जघ्नुर्दुमैर्गिरिगदेषुभिरंगदाद्याः सीता
भिमर्षहत मंगलरावणेशान् १९ रक्षस्पतिः स्वबलनष्टिमवेक्ष्य रुष्ट आरुह्य यानकमथाभिससार रा
मं स्वः स्यन्दने द्युमति मातलिनोपनीते विभ्राजमानमहनन्निशितैः क्षुरप्रैः ३१ रामस्तमाह पुरुषाद
पुरीषयन्नः कान्तासमक्षमसतापहृताश्ववत्ते त्यक्तत्रपस्य फलमद्य जुगुप्सितस्य यच्छामि काल इव क
र्तुरलंघ्यवीर्यः ११ एवं क्षिपन्धनुषि संधितमुत्ससर्ज बाणं सवज्रमिव तद्धृदयं बिभेद सोसृग्वमन्दश
मुखैर्न्यपतद्विमानाद्धाहेति जल्पतिजने सुकृतीव रिक्तः २२ ततो निष्क्रम्य लंकाया यातुधान्यः सहस्रशः
मन्दोदर्या समं तस्मिन्प्ररुदत्य उपाद्रवन् २४ स्वान्स्वान्बन्धून्परिष्वज्य लक्ष्मणेषुभिरर्दितान् रुरुदुः सुस्व
रं दीना घ्नन्त्य आत्मानमात्मना २५ हा हताः स्म वयं नाथ लोकरावण रावण कंयायाच्छरणं लंकात्वद्विहीना
परार्दिता २६ नैवेदं महाभाग भवान्कामवशं गतः तेजोनुभावं सीताया येन नीतो दशामिमां २१
कृतैषा विधवा लंका वयं च कुलनंदन देहः कृतोन्नं गृध्राणामात्मा नरकहेतवे २८ श्रीशुक उवाच स्वानां
विभीषणश्चक्रे कोसलेन्द्रानुमोदितः पितृमेधविधानेन यदुक्तं सांपरायिकं २९
ते:श्रम: कल्नोयथायत्सनीतिवा ३१ रिक्त: क्षीणपुण्य: सुकृती विमानाद्दिव विमानात्पुष्पकान्न्यपतदितिवा २३ र
दंसन्तीं वा विलापमाह ततः स्तुति पंचभिः मदनल्पमुद्रंयस्याः तया रावणभार्यया सह २४ २५ परैरर्दिता २६
२७ गृध्राणामत्र भक्ष्यः नरकहेतवे नरकभोगाय २८ सांपरायिकं और्ध्वदेहिकं २९ आत्मनः स्वस्य सन्दर्शनेन तय
आह्लादः तेन विकसन्मुखपंकजं यस्याः ता ३॰ ३० ओं नमो बालकृष्णाय यशोदानंदनाय पार्वतीशोकविनाशाय

[illegible]

हितोप ३

श्रीः
भा॰ न॰
टी॰
९२

३१ यानं पुष्पकं भ्रातृभ्यां लक्ष्मणसुग्रीवाभ्यां आशु दत्वा तेनापि सहैव ययौ ३२ गोमूत्रयावकं गोमूत्रपक्वयावभोजिनं
३३ ३४ ३५ स्वपादाविराजनामविनायोध्यामप्रविशन्न्यस्य वामयत्र निमितवान् तस्मात्सकाशात् गीतादिभिर्ब्रह्मघोषाभि॰
प्रघुष्यतोभिमुखं ययौ ब्रह्मघोषेण महता घोषेण पठद्भिः ३६ स्वर्णरसात्काः कक्षाः प्रान्ता यासां ताभिः पताकाभिर्हैमैर्वि॰
चित्रवर्णैर्ध्वजविशेषणानि ३७ पारमेष्ठ्यानि राजार्हाणि छत्रचामरादीनि प्रेम्णा प्रक्लिन्नं हृदयं ईक्षणे च यस्य ३८ नव

रामः प्रियतमां भार्यां दीनां वीक्ष्यान्वकम्पत आत्मसन्दर्शनाह्लादविकसन्मुखपंकजां ३१ आरोप्यारुरु
हे यानं भ्रातृभ्यां हनुमद्युतः विभीषणाय भगवान्दत्त्वा रक्षोगणेशतां ३२ लंकमायुश्च कल्पान्तं ययौ चीर्ण
व्रतः पुरीं अवकीर्यमाणः कुसुमैर्लोकपालार्पितैः पथि उपगीयमानचरितः शतधृत्यादिभिर्मुदा ३३
गोमूत्रयावकं श्रुत्वा भ्रातरं वल्कलाम्बरं महाकारुणिकोऽतप्यज्जटिलं स्थण्डिलेशयं ३४ भरतः प्राप्त
माकर्ण्य पौरामात्यपुरोहितैः पादुके शिरसि न्यस्य रामं प्रत्युद्यतोऽग्रजे ३५ नन्दिग्रामात्स्वशिबिराद्गीतवादि
त्रनिःस्वनैः ब्रह्मघोषेण च मुहुः पठद्भिर्ब्रह्मवादिभिः ३६ स्वर्णकक्षपताकाभिर्हैमैश्चित्रध्वजै रथैः स
दश्वै रुक्मसन्नाहैर्भटैः पुरटवर्मभिः ३७ श्रेणीभिर्वारमुख्याभिर्भृत्यैश्चैव पदानुगैः ३८ पारमेष्ठ्यान्युपा
दाय पण्यान्युच्चावचानि च पादयोर्न्यपतत्प्रेम्णा प्रक्लिन्नहृदयेक्षणः ३८ पादुके न्यस्य पुरतः प्राञ्जलिर्बाष्प
लोचनः तमाश्लिष्य चिरं दोर्भ्यां स्नापयन्नेत्रजैर्जलैः ३९ रामो लक्ष्मणसीताभ्यां विप्रेभ्यो येऽर्हसत्तमाः ते
भ्यः स्वयं नमश्चक्रे प्रजाभिश्च नमस्कृतः ४० धुन्वन्त उत्तरासङ्गान्पतिं वीक्ष्य चिरागतं उत्तराः कोसला माल्यैः किर
न्तो ननृतुर्मुदा ४१ पादुके भरतोऽगृह्णाच्चामरव्यजनोत्तमे विभीषणः ससुग्रीवः श्वेतच्छत्रं मरुत्सुतः
४२ धनुर्निषङ्गाञ्छत्रुघ्नः सीता तीर्थकमण्डलुं अबिभ्रदङ्गदः खड्गं हैमं चर्म क्षराण्नृप ४३ पुष्पकस्थोऽन्वि
तः स्त्रीभिः स्तूयमानश्च वन्दिभिः विरेजे भगवान्राजन्ग्रहैश्चन्द्र इवोदितः ४४ भ्रातृभिर्नन्दितः सोऽपि सो
त्सवां प्राविशत्पुरीं प्रविश्य राजभवनं गुरुपत्नीः स्वमातरं गुरून्वयस्यावरजान्पूजितः प्रत्यपूजयत् वैदेही ल
क्ष्मणश्चैव यथावत्समुपेयतुः ४५ पुत्रान्स्वमातरस्तास्तु प्राणांस्तन्व इवोत्थिताः आरोप्याङ्केऽभिषिञ्चन्त्यो बाष्पौ घैर्विजहुः शुचः ४६

नैः स्नापयित्वाश्लिष्य ३९ येऽर्हसत्तमाः कुलवृद्धाः तेभ्योऽपि नमश्चक्रे ४० अयोध्याप्रवेशप्रकारमाह पादुके इति सार्द्धैः त्रिभिः
४२ यत्खड्गं निषङ्गौ वन्ताच्च सह्लराट् जांबवान् ४२ ४४ गुरुपत्नीः कैकेय्याद्याः वयस्यानवरजांश्च यथावत् अत्र उक्रमात्समुपेयतुः नः ४५ बाष्पौघैरभिषिञ्चन्त्यः शुचः शोकान्विजहुः शोषेऽप्यथ ४६

४७ ४८ ४९ ५० ५१ ५२ ५३ ५४ इति भावा नव दशमः १० ततश्चैकादशेऽध्यायमावसत्स्ववजैः सह यत्नादियद्वा
काद्येषां रामस्तस्त्वव्याप्तेन तदेतदानास्तादिशो मध्ये यावती भूः तो ब्राह्मणापवादितीति मन्यमानः ३ अयं यश्रीरामः ततश्चा

जटानिर्मुच्य विधिवत्कुलवृद्धैः समं गुरुः अभ्यषिंचद्यथैवेंद्रं चतुःसिन्धुजलादिभिः ४७ एवं कृतशिरःस्नानः
सुवासाः स्रग्व्यलंकृतः स्वलंकृतैः सुवासोभिर्भ्रातृभिर्भार्यया बभौ ४८ अग्रहीदासनं भ्रात्रा प्रणिपत्य प्रसादितः
प्रजाः स्वधर्मनिरता वर्णाश्रमगुणान्विताः जुगोप पितृवद्रामो मेनिरे पितरं च ते ४९ त्रेतायां वर्तमानायां कालः
कृतसमोऽभवत् रामे राजनि धर्मज्ञे सर्वभूतसुखावहे ५० वनानि नद्यो गिरयो वर्षाणि द्वीपसिन्धवः सर्वे कामदु
घाश्चासन्प्रजानां भरतर्षभ ५१ नाधिव्याधिजराग्लानिदुःखशोकभयक्लमाः मृत्युश्चानिच्छतां नासीद्रामे राजन्य
धोक्षजे ५२ एकपत्नीव्रतधरो राजर्षिचरितः शुचिः स्वधर्मं गृहमेधीयं शिक्षयन्स्वयमाचरत् ५३ प्रेमानुवृ
त्त्या शीलेन प्रश्रयावनता सती धिया ह्रिया च भावज्ञा भर्तुः सीताहरन्मनः ५४ इति भाग नव दशमः १० शुकः
भगवानात्मनात्मानं राम उत्तमकल्पकैः सर्वदेवमयं देवमीजेऽथाचार्यवान्मखैः १ होत्रेऽददाद्दिशं प्राचीं ब्रह्मणे
दक्षिणां प्रभुः अध्वर्यवे प्रतीचीं वा उदीचीं सामगाय सः २ आचार्याय ददौ शेषां यावती भूस्तदन्तरा मन्यमान इदं
कृत्स्नं ब्राह्मणोऽर्हति निःस्पृहः ३ इत्ययं तदलंकारवासोभ्यामवशेषितः तथा राज्ञ्यपि वैदेही सौमंगल्यावशेषि
ता ४ ते तु ब्राह्मणदेवस्य वात्सल्यं वीक्ष्य संस्तुतं प्रीताः क्लिन्नधियस्तस्मै प्रत्यर्प्येदं बभाषिरे ५ ब्राह्म ऊचुः अप्र
त्तं नस्त्वया किं नु भगवन्भुवनेश्वर यन्नोऽन्तर्हृदयं विश्य तमो हंसि स्वरोचिषा ६ नमो ब्रह्मण्यदेवाय रामायाकुण्ठमेधसे
उत्तमश्लोकधुर्याय न्यस्तदण्डार्पितांघ्रये ७ कदाचिल्लोकजिज्ञासुर्गूढो रात्र्यामलक्षितः चरन्वाचोऽशृणोद्रामो
भार्यामुद्दिश्य कस्यचित् ८ नाहं बिभर्मि त्वां दुष्टामसतीं परवेश्मगां स्त्रैणो हि बिभृयात्सीतां रामो नाहं भजे पुनः
९ इति लोकाद्बहुमुखाद्दुराराध्यादसंविदः पत्या भीतेन सा त्यक्ता प्राप्ता प्राचेतसाश्रमं १० अन्तर्वत्न्यागते काले य
मौ सा सुषुवे सुतौ कुशो लव इति ख्यातौ तयोश्चक्रे क्रिया मुनिः ११ ॥

सौमंगल्यमाभरणादिकं तावन्मात्रमवशेषितं यस्मात्तद्व्यतिरिक्तं हिरण्यादि सर्वं दत्तमित्यर्थः ५ अप्रत्तं अदत्तं किं सर्वं दत्तं नः ७ ८ ९
नित्यर्थः विषयप्रविष्ट ६ न्यस्तदण्डैर्मुनिभिरर्पितौ वितन्वन्तो १० ११ १२
असंविदः अज्ञानभावेन सो वाल्मीकिः तस्याश्रमं प्राप्ता

अंतर्वत्न्यौ गर्भिण्यौ क्रिया जातकर्माद्याः १५ ईश्वरोपि प्रभुरोढुं नाशक्नोत् १६ नचातिचित्रमेतदित्याह स्त्रीपुंसोः प्रसंगः आ-
सक्तिः त्रासमावहतीति तथा विभुकेवलगार्थः पाठांतरं सम्राजां किमुतेति ग्राम्य गिरिकामिः अग्निहोत्रमजुहोत् १८ आत्मज्यो-
तिर्निजंधाम १९ जलधिबन्धनं स्वरगस्त्रस्य हतमात्रवन्यजतीदृक् कपिभिरस्त्र वर्णनं न तमपि यशः स्तुतिर्न भवतिन इत्यत्र
अधिकसाम्याभ्यां विमुक्तं धाम प्रभावो यस्य तस्य किं कपयः सहायाः अतः सुरयाच्ञया आत्तया लीलामात्रं तथैवेदमपि युक्तमेव
तदित्याह सुराणां याच्ञया आत्ता स्वीकृता लीलार्थं तनुर्येन तस्य २० एवंविधलीलाप्रयोजनं दर्शयन् प्रणमति यस्येति यशो

सुबाहुः श्रुतसेनश्च शत्रुघ्नस्य बभूवतुः गन्धर्वान्कोटिशो जघ्ने भरतो विजये दिशां तदीयं धनमानीय सर्वं रा-
ज्ञे न्यवेदयत् १३ शत्रुघ्नश्च मधोः पुत्रं लवणं नाम राक्षसं हत्वा मधुवने चक्रे मथुरां नाम वै पुरीं १४ मुनौ निक्षि-
प्य तनयौ सीता भर्त्रा विवासिता ध्यायंती रामचरणौ विवरं प्रविवेश ह १५ तच्छ्रुत्वा भगवान्रामो रुंधन्नपि
धिया शुचः स्मरंस्तस्या गुणांस्तांस्तान्नाशक्नोद्रोद्धुमीश्वरः १६ स्त्रीपुंप्रसंग एतादृक् सर्वत्र त्रासमावहः अ-
पीश्वराणां किमुत ग्राम्यस्य गृहचेतसः १७ तत ऊर्ध्वं ब्रह्मचर्यं धारयन्नजुहोत्प्रभुः त्रयोदशाब्दसाहस्रम-
ग्निहोत्रमखंडितम् १८ स्मरतां हृदि विन्यस्य विद्धं दंडककंटकैः स्वपादपल्लवं राम आत्मज्योतिरगात्ततः
१९ नेदं यशो रघुपतेः सुरयाच्ञयात्तलीलातनोरधिकसाम्यविमुक्तधाम्नः रक्षोवधो जलधिबंधनमस्त्र-
पूगैः किं तस्य शत्रुहनने कपयः सहायाः २० यस्यामलं नृपसदःसु यशोधुनापि गायंत्यघघ्नमृषयो दि-
गिभेंद्रपट्टं तं नाकपालवसुपालकिरीटजुष्टपादांबुजं रघुपतिं शरणं प्रपद्ये २१ स यैः स्पृष्टोभिदृष्टो वा संवि-
ष्टोनुगतोपि वा कोसलास्ते ययुः स्थानं यत्र गच्छंति योगिनः २२ पुरुषो रामचरितं श्रवणैरुपधारयन् आनृ-
शंस्यपरो राजन्कर्मबंधैर्विमुच्यते २३ राजोवाच कथं स भगवान्रामो

नृणां युधिष्ठिरादीनां सदःसु सभासु यशो मार्कंडेयादयो गायंति दिगिभेंद्राणां पट्टवदाभरणं नृपतन्यायेन व्याप्तमित्यर्थः ना-
कपाला देवाः वसुपाला भूवसुधापालाः तेषां किरीटैर्जुष्टपादांबुजं यस्य तं रघुपतिं पाठांतरे तु तस्य पदं रघुपतेर्जुष्टपादांबु-
जं प्रपद्ये इत्यर्थः २१ स रामः संविष्टाः उपवेशितः अनुगता वा ये ते कोसलदेशवासिनः सर्वेपि यत्र योगिनो गच्छंति तत्
स्थानं ययुः २२ आनृशंस्यपरोऽपक्षपातनिष्ठः सन् विमुच्यते २३ स रामः स्वयं कथमवर्ततेति भ्रातॄन्वा प्रति कथमवर्त-
त कथं भ्रातरस्तस्मिन्वा ईश्वरे तथा प्रजादयः पौराः कथमन्ववर्ततेति प्रश्नत्रयम् २४

तथा श्रीरामस्य अन्तःपुरादिषु रतिप्रकारमाह यथेति ग्रन्थेनैव अन्तःपुरमपि तदा सानुसारितया हृन्निरूढा ग्रथेति सिंहासनस्वीकारानन्तरं २५ पुरीं वर्णयति त्रिभिः गवाक्षैः मन्दविटङ्कभित्तिप्रसिद्धामार्गीयस्यां तरलं मन्दामिवस्तु न्नावेति विनिवेदं पाठान्तरे वासितरां कामिनां मनो गामिवेत्यर्थः २८ यावाणीहाम्मि तस्मिन् ग्राहं तन्नेपथ्ये रतिं विवाहं तु येणानयोजितानि यत्र सिंहासनं पाहीति २९ प्रजानां तस्मिन् हन्मिमाह ततः प्रजा इति ३० स्वयं तु कथमवर्णनेन सा

अथाविशद् दिग्विजये प्रावृत्तत्रिभुवनेश्वरः आत्मानं दर्शयन् स्वानां पुरीं मेदिनसागरः २५ प्रसिद्ध मार्गगवाक्षैः करिणां महशीकरैः स्वात्मनं प्राप्तमालोक्य मत्तां वासितयामिवा २८ प्रासादगोपुर सभाचैत्य देवगृहादिषु विन्यस्तहेमकलशैः पताकाभिश्च मण्डिताम् ३० पूगैः स्वर्णैः रम्भाभिः पट्टिकाभिः सुवाससां आदर्शैरंशुकैर्माल्यैः कृतकौतुकतोरणाम् २८ तमुपेयुस्तत्र तत्र पौरा अर्हणपाणयः आशिषो युयुजुर्देव पाहीमां प्राक् त्वयोद्धृताम् २९ ततः प्रजा वीक्ष्य पतिं चिरागतं दिदृक्षयोत्सृष्टगृहाः स्त्रियो नराः आरुह्य हर्म्याण्यरविन्दलोचनमतृप्तनेत्राः कुसुमैरवाकिरन् ३० अथ प्रविष्टः स्वगृहं जुष्टं स्वैः पूर्वराजभिः अनन्ताखिलकोशाढ्यमनर्घ्योरुपरिच्छदम् ३१ विद्रुमोदुम्बरद्वारैर्वैदूर्यस्तम्भपङ्क्तिभिः स्थलैर्मारकतैः स्वच्छैर्भ्राजत्स्फटिकभित्तिभिः ३२ चित्रस्रग्भिः पट्टिकाभिर्वासोमणिगणांशुकैः मुक्ताफलैश्चिदुल्लासैः कान्तकामोपपत्तिभिः ३३ धूपदीपैः सुरभिभिर्मण्डितं पुष्पमण्डनैः स्त्रीपुम्भिः सुरसंकाशैर्जुष्टं भूषणभूषणैः ३४ तस्मिन् स भगवान् रामः

तदाह अथेति यावत्समाप्ति स्वगृहं प्रविष्टः तस्मिन् रेम इति पञ्चमेनान्वयः गृहं वर्णयति सार्धैस्त्रिभिः अनन्ताय अखिलानां रत्नादीनां कोशः तेनाढ्यं अनर्घ्य उरवः परिच्छदा यस्मिन् ३१ विद्रुममयाः उदुम्बरा देहल्यो येषु तैर्द्वारैः स्वच्छैः स्थलैः तु तीयान्तानां मण्डितं इति तृतीयेनान्वयः ३२ वाससां मणिगणानां च अंशुकैः दीप्तिभिः चिदुल्लासैः उज्ज्वलैः यद्वा चिदिति क्वचित् क्वचित् वैदूर्यस्तम्भादिषु यथा शोभमानैर्मुक्ताफलैर्मण्डितमित्यर्थः कान्ताः कमनीयाः कामं यथेष्टं उपभोगसाधनानि ३३ भूषणानां भूषणभूतैः ३४ ३५ ॥ ॥

श्री० भा० न० टी० ४०

वृद्धानामध्येयद्यहानृभिरभिध्यानमेवाद्यिपहलवं यस्येति ३९ इति भावार्थे नवम पेय ह्रशा यः ११ द्वादशो रामव्रजस्य कुशस्यान्वयव्याख्याने एवमिन्नाकुषंबंसस्य ग्रामादस्येतिनोन्वयः कुशस्य श्रीरामपुत्रस्य ग्रानियिस्ततो भवत् १ सुर्बकसंभवः श्रेकस्योग्रात्तेभूतः २ हिरण्यनाभः कथेभूतः जैमिनेः शिष्योयोगाचार्यः ३ नदाह

त्रुधनैवययाकालेवामांधर्ममपीडयन् वर्षह्गोबहून्नन्त्वणामभिध्यानोद्यिपहलवः ३९ इ
ति भाग नेन मस्क पका योथा ५ कुक० बाव कुशस्यानिथिस्तस्मान्निष
धस्तस्मान्नभः पुंडरीकोथनत्सुतः क्षेमधन्वाभवन्नतः १ देवानीकस्ततोहीनः पारियात्रोथ
नत्सुनः ततोवलस्थलस्तस्माद्वज्रनाभोर्कसंभवः २ खगणस्तत्सुतस्तस्माद्विधृतिश्चाभवत्सु
तः ततोहिरण्यनाभोभूद्योगाचार्यस्तुजैमिनेः ३ शिष्यः कौसल्यग्राध्यात्म्ययाज्ञवल्क्योध्यगा
यतः योगमहोदयंहृदयग्रंथिभेदनं ४ पुष्पोहिरण्यनाभस्य ध्रुवसंधिस्ततोभवत्
सुदर्शनोथाग्निवर्णः शीघ्रस्तस्यमरुस्सुतः ५ योसावास्तेयोगसिद्धः कलापग्रामवासिभिः क
लेरंते सूर्यवंशं नष्टंभावयिताघृतः ६ तस्मात्प्रसुश्रुतस्तस्य संधिस्तस्याप्यमर्षणः महस्वांस्त
तस्तस्मा द्विश्वसाह्वान्वजायत ७ ततः प्रसेनजित्तस्मात्तक्षकोभविताघृतः ततोबृहद्बलो
यस्तु पित्राते समरेहतः ८ एतेहीक्ष्वाकुभूपाला अतीताः शृण्वनागतान् बृहद्बलस्यभविताघु
त्रोनाम्नाबृहद्रणः ९ उरुक्रियः ततस्तस्य वत्सवृद्धोभविष्यति प्रतिव्योमस्ततोभानुर्दिवाको वा
